दयानन्दसूक्तिसप्तशती

(सूक्तिकाव्यम्)

रचयिता
शिवकुमार मिश्रः

१९८८

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली—११० ०५९

दयानन्दसूक्तिसप्तशती

सूक्तिकाव्यम्

रचयिता
शिवकुमार मिश्रः

१९८८

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११० ०५९

दयानन्दसूक्तिसप्तशती

(सूक्तिकाव्यम्)

प्रणेता :

श्री शिवकुमार मिश्रः

एम०ए० (हिन्दी-संस्कृतयोः), साहित्याचार्यः, विद्याभास्करः

१९८८

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

दयानन्दसूक्तिसप्तशती (सूक्तिकाव्यम्)

लेखकः : शिवकुमार मिश्रः

प्रकाशकः : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नई दिल्ली-११००५९

मुद्रकः : प्रवीण प्रिंटिंग सर्विस
३५, टी एक्स्टैंशन उत्तम नगर,
नई दिल्ली-११००५९

संस्करणम् : प्रथमम्, १९८८

मुल्यम् : पञ्चदश रूप्यकाणि रु० १५-००

DAYĀNANDA-SŪKTI-SAPTAŚATĪ

Author : Mishra, Shiv Kumar

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printer : Parveen Printing Service
35, T Extn., Uttam Nagar,
New Delhi-110059

Edition : First, 1988

Price : Rupees Fifteen Only Rs. 15-00

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली'—इत्येतस्याः संस्थाया उद्देश्येष्वन्यतममस्ति सद्ग्रन्थानां प्रकाशनम। तदनुसारमद्यावधि परिषदा षट्पञ्चाशद्ग्रन्थानां प्रकाशनं कृतम्।

इदानीञ्च परिषदा सप्तपञ्चाशत्तमग्रन्थरूपेण श्रीशिवकुमारमिश्र-प्रणीता 'दयानन्दसूक्तिसप्तशती' प्रकाश्यते।

श्रीमिश्रमहाभागस्य वंशपरिचयस्तत्प्रणीतेषु अष्टादशपद्येषु ग्रन्थारम्भे दीयते। तदनुसारमस्य पितुर्नाम श्रीप्रभुदयालमिश्रः, मातुर्नाम श्रीमती कौशल्या च। 'हरदोई' जनपदान्तर्गते 'पिहानी'-संज्ञके ग्रामे अयं महानुभावः जनि लेभे।

उत्तरप्रदेशस्थराजकीयइण्टरकालेजेषु पञ्चत्रिंशत्प्रायवर्षाणि यावदध्यापन-वृत्तिमनुष्ठाय अद्यत्वेऽसौ 'चौहान थोक, हरदोई (उ०प्र०)'—इति स्थाने स्थायिरूपेण वसन् आर्यसमाजस्य प्रचारार्थम् उत्तरप्रदेशस्य नैकस्थानानि पर्यटति।

वाराणसीस्थराजकीयसंस्कृतकालेजस्य 'साहित्याचार्य' परीक्षां, आगरा-विश्वविद्यालयस्य हिन्दी-संस्कृत-विषययोः एम०ए०-परीक्षे तथा च ज्वालापुर-गुरुकुलस्य 'विद्याभास्कर'-परीक्षां समुत्तीर्यानेन स्ववंशस्य विद्यार्जनप्रीतिः प्रथिता। छात्रावस्थात एव श्लोकनिर्माणेऽस्य रुचिराविरासीत्।

आर्यसमाजसंस्थापकमहर्षिस्वामिदयानन्दसरस्वतीमहाभागानां सन्देशेष्वस्य भूयसी आस्था। स्वामिवर्यैः भारतीयसमाजस्य रूढिग्रस्ततां विलोपयितुं ये ये प्रयत्ना आचरिताः, वेदानां महत्त्वप्रतिष्ठापनार्थं यानि भाषणानि कृतानि, विधवानां दलितानां च समुत्थानार्थं यः सन्देशः प्रदत्तः, अपराणि च यानि

देशभक्तिवर्धकानि कार्याण्यनुष्ठितानि—तैः भारतीयेतिहासविदः सुपरिचिता एव सन्ति । स्वामिभिः जीवपरमेश्वरौ, वेदान्, वेदाध्ययनं, धार्मिकान् विदुषः, कर्तव्यं, दुःखनाशं, सुखप्राप्तिं, दीर्घायुःसाधनं, पुण्यं, पापं, पतिं, पत्नीम्, अधार्मिकान्, निर्भयजनान्, विद्यां, वेदाधिकारिणं, तीर्थं, तपस्त्यागौ, अतिथिम्, आचार्यम्, आप्तजनम्, सूक्ष्मबुद्धिं, भूतं, मूर्खखलौ, मित्रं, लोभम्, आलस्यं, भारतं, विद्याविद्ये, यज्ञम्, आचारानाचारौ, राजानं, प्रजां, मातापितरौ, मद्यपानम्, आत्मप्रशंसां, नव्यर्षीन्, परोपकारं, पुत्रं, विजयिनं, संन्यासिहृदयं, धर्मं, गोरक्षां, कर्मफलं, पुरुषार्थं, वर्णाश्रमव्यवस्थां, प्रवचनं, सहभक्षणं, नीतिवचनं, मुक्तितः पुनरावृत्तिं, सृष्टिनिर्माणप्रयोजनं, कृषिप्रशंसां, पुराणविरोधं, श्रेष्ठजीवनं, मौनं, स्वदेशवेशं, निवृत्तिमार्गं, विद्यार्थिनं, प्रारब्धम्, आधुनिकान् आर्यान्, सूतकनिषेधं, मनुस्मृतिम्, आस्तिकान्, मूर्तिपूजनं, गङ्गाम्, अवतारान्, बालविवाहम्, आधुनिकसाधून् गायत्रीप्रणवजपप्राणायामान्, आर्यसमाजं, धार्मिकभेदनिवारणं, समारोहेषु योगशिक्षाकारणं, पातिव्रतं, वेश्यागमननिषेधम् अन्यांश्च तांस्तान् विषयानवलम्ब्य समये समये ये विचाराः स्वग्रन्थेषु प्रदत्तास्तेषां सरलसंस्कृतश्लोकेषु प्रस्तुतिः श्रीमिश्रमहाभागेन 'दयानन्दसूक्तिसप्तशत्यां' विहिता, तथा च महर्षिदयानन्दस्वामिनां व्यक्तित्वमवलम्ब्यापि विचारा अभिव्यक्ताः। 'दयानन्दसूक्तिसप्तशती' निश्चप्रचं सप्तशती-परम्परायां कामपि नूतनां विच्छित्तिं निदधाति । यथा संस्कृत-हिन्द्यादिभाषासु प्राचीनैः कविभिः सप्तशत्यो विरचितास्तथैवाद्यत्वेऽपि विरच्यन्ते—एतस्य तथ्यस्य परिचयोऽस्माभिर्यथा देववाणी-परिषदा इतः पूर्वं प्रकाशितया डा० शिवदत्तचतुर्वेदप्रणीतया'स्फूर्तिसप्तशत्या' लब्धस्तथैव श्रीशिवकुमारमिश्रप्रणीतया 'दयानन्दसूक्तिसप्तशत्या'पि लभ्यते । पूर्वकविप्रणीत-विविधग्रन्थामृतास्वादनक्रीडादुर्ललितान्यपि धीमतां हृदयानि हर्तुं प्रभवेयुरस्याः पद्यानीति काम्यतेऽस्माभिः ।

अहं देववाणी-परिषत्पक्षतः श्रीशिवकुमारमिश्रमहाभागाय वर्धापनानि व्याहरामि येन सुभाषितरचनापरम्परायां स्व योगदानं कृत्वा देववाणी समाराधिता । विचारशीलोऽयं कविः दीर्घायुष्यं लब्ध्वा सततं स्वाध्याय-प्रवचन-रचनासु संलग्नस्तिष्ठेत् इति प्रार्थ्यते परमेश्वरः ।

ग्रन्थमुद्रणे क्वचिज्जातानि स्खलितानि संशोधयितुं सहृदयाः विद्वांसश्च सादरं प्रार्थ्यन्ते ।

अन्ते च, ग्रन्थकारानुजं श्रीरामकुमारमिश्रमहाभागं साधुवादैः सभाजयामि येन प्रूफसंशोधनादिकार्यैः ग्रन्थप्रकाशने बहुविधं साहाय्यमाचरितम् ।

विदुषामाश्रवः

(डा० रमाकान्त शुक्लः)
महासचिवः
देववाणी-परिषद्, दिल्ली
६ वाणी-विहारः, नयी दिल्ली-११००५९

१३.१२.१९८८
देववाणी-परिषदो
द्वादशः स्थापनादिवसः

पुस्तकप्राप्तिस्थानानि :

(१) देववाणी-परिषद्, दिल्ली,
६, वाणी-विहारः, नयी दिल्ली-११००५९

(२) श्री शिवकुमार मिश्रः
शास्त्री, साहित्याचार्यः,
चौहानथोक, हरदोई-२४१००१ (उ०प्र०)

(३) श्री रामकुमार मिश्रः
अमर संस्मृति संस्थानम्
डब्ल्यू जेड-२१४-डी, वीरेन्द्रनगरम्,
नयी दिल्ली-११००५८

कविवंशपरिचयः

पितामहस्य प्रपितामहो मे,
बभूव पूर्वं छविनाथनामा।
यः कान्यकुब्जात् समुपेत्य धाम्ना,
विभूषयामास पुरीं पिहानीम् ॥१॥

पिहानी-परसूमिश्र-वंशवंशसमुद्भवम् ।
बालगोविन्दनामैकं वंशलोचनमुद्गतम् ॥२॥

तस्य पंचसु पुत्रेषु द्वितीयस्याभवन् पुनः ।
सुताः शिवसहायस्य चत्वारो विनयान्विताः ॥३॥

श्रीश्यामलालस्य पितामहस्य चतुर्षु पुत्रेषु तृतीयपुत्रः।
प्रभूदयालः जनको मदीयः दयाकरः कर्मपरायणश्च ॥४॥

कौशल्यया तस्य विवाहकालेऽ
भवद् विवाहो मतिनीतिमत्या।
पुत्रद्वयं या शिव-रामपूर्वं
कुमारयुक्तं सुषुवे सुतां च ॥५॥

लक्ष्मिस्वरूपां कमलाभिधानां या स्वर्गता यौवन काल एव।
शांतस्वभावाऽतिमता च पित्रोरुदारचिता सदृशी च मातुः ॥६॥

ज्येष्ठं सुतं मे जनकः स्वमोहं कृतोपवीतं प्रविहाय तूर्णम् ।
ज्वालापुरीये च गुरोः कुले मां प्रवेष्टुकामः सुतरां बभूव ॥७॥

श्रीदर्शनानन्द-महाप्रभावसंस्थापिते पण्डितवर्यसेव्ये ।
प्रवेश्य मामश्रुमुखो रुदन्तमालम्ब्य धैर्यं गृहमाजगाम ॥८॥

वर्षत्रयानन्तरमेव हा हा, दौर्भाग्यतो नः प्रविहाय सर्वान्।
दिवं प्रयातो जनको ऽस्मदोयोऽनाथान् विधायेश्वरमात्रनाथान् ॥९॥

तदा पितृव्यो जनकस्य ज्येष्ठभ्राता सदा वंशहितो दयालुः ।
देवोपमो वंशसहायतार्थमयाचितः साधनतत्परोऽभूत् ॥१०॥

नाम्ना राधाकृष्णं, तमहं कृतज्ञतापूर्णहृदयेन ।
सर्वैर्गुरुभिः साधं, श्रद्धोपेतः स्मरामि मुहुः ॥११॥

श्रीसंयुता हेमलताभिधाना न केवलं गेहविधानलग्ना ।
अध्यापयन्ती सहधर्मिणी मे यथार्थतोऽभूद्गृहिणी मदीया ॥१२॥

आशापुष्पे, इन्दिरापद्मजे च कन्याः सूताः पुत्र एको यया च ।
नाम्ना ख्यातो योऽवनीन्द्रो जगत्यामेते सर्वे मे स्मृतौ सन्निविष्टाः ।१३।

अनुजं रामकुमारं, प्रकाशनेऽस्मिन् सहायकर्तारम् ।
गुणतोऽग्रजं स्मरेयं कथं न संशोधनादिकार्यरतम् ॥१४॥

शान्तां पत्नीं तदीयां पुत्रं ज्येष्ठं रवीन्द्रनामानम् ।
ज्योत्स्नाऽपर्णे च सुते, स्मरणीयाः भूरिशः सर्वे ॥१५॥

अन्ते चाऽमरदीपं, कनिष्ठपुत्रं महद्गुणागारम् ।
यातमकाले निधनं वयं स्मरामो विलापपराः ॥१६॥

स्मृतौ संस्थापिते तस्य संस्थाने प्रथमं पुरः ।
भवतां समर्पितं पुष्पमिदं स्यात् तुष्टये तु वः ॥१७॥

—शिवकुमार मिश्रः

दयानन्दसूक्तिसप्तशती

(प्रणेता—श्री शिवकुमार मिश्रः)

जीवपरमेश्वरौ

ध्यायन्ति तन्मयधियः पुरुषार्थिनो ये प्रातर्विहाय शयनं पुरुषं पुराणम् ।
आलस्यलेशरहिताश्च तथैव सायं ते प्राप्नुवन्ति धनधान्यनिधिं महान्तम् ।१।

जले निमग्नाः पुरुषा विशुद्धा वहिर्यथा यान्ति तथैव जीवाः ।
नित्यं परब्रह्मणि ज्ञानमोदरूपे निमग्ना मुदिता भवेयुः ।।२।।

आसने दृढतां याते श्रमो नैव विजायते ।
उपासनाविधाने च शीतमौष्ण्यं न बाधते ।।३।।

चिन्तयन्त्यास्तिका हृत्सु सर्वसाक्षिणमीश्वरम् ।
रक्षितास्तेन निष्पापा धार्मिकाः सुखिनश्च ते ।।४।।

अवगत्य जगत्पतिं जना मरणागाधसमुद्रतः पृथक् ।
प्रभवन्ति सुखावहोऽस्त्ययं नहि पन्था अपरोऽस्ति मुक्तये ।।५।।

रक्षको विद्यते येषां जगतां रक्षकः स्वयम् ।
संभविष्यति संग्रामे कथं तेषां पराजयः ।।६।।

मूलं निखिलविद्यानामीशध्यानमतो यदा ।
विद्येयं ह्रसते यत्र स देशो याति दुर्गतिम् ।।७।।

सदैव सुखिनः सन्तु प्रभुभक्तिपरायणाः ।
धर्मविद्याप्रचारस्य कार्ये लग्नाः समे जनाः ।।८।।

गुणवत्पतिसेवने रता वरनारी वपुषा हृदा धनैः ।
अनुकूलतया दिवानिशं व्यवहारं कुरुते यथा सती ।।९।।

प्रभुभक्तियुतास्तथा समे मिलिताः सन्तु परस्परं जनाः ।
परमं सुखमाप्नुयुः सदा द्रुतमायान्तु मदीयबान्धवाः ॥१०॥
(युग्मकम्)

ईर्ष्याद्वेषादिका दोषनाँस्त्यक्त्वेश्वरसमं समैः ।
जीवैः साकं सुहृद्भावरक्षको वर्धते जनः ॥११॥

आरब्धुमिच्छति जनः समुपासनां यो
वैरं स केन चिदपीह नरो न कुर्यात् ।
प्रीत्या सदा व्यवहरेत् सकलैर्मनुष्यैः
सत्यं वदेदनृतवाक् च कदापि न स्यात् ॥१२॥

चौर्यं त्यजेन्न विदधीत कदापि दर्पं
स्याल्लम्पटो न विनयेन विभूषितः स्यात् ।
कुर्याद् वशे च सकलानि निजेन्द्रियाणि
जेयानि सत्यव्यवहारपरः सदा स्यात् ॥१३॥ युग्मकम्

उपासनासमुत्पन्नविवेकेन युतो नरः ।
शोकं क्षणिकवस्तूनामानन्दं विजहाति च ॥१४॥

सत्येन प्रेम्णा परमेश्वरस्य ध्यानं करिष्यन्ति सदैव भक्त्या ।
ये, ते कृपालोः परमेश्वरस्य प्राप्स्यन्ति मुक्तौ दयया प्रमोदम् ॥१५॥

शैत्यातुरस्य पुरुषस्य निवृत्तिमेति,
शैत्यं यथाग्निनिचयान्तिकमागतस्य ।
जीवस्यतद्वदखिलेश्वरसन्निधानात्
पूता भवन्ति गुणकर्ममयाः स्वभावाः ॥१६॥

तमेवेष्टदेवं विजानन्तु नम्यं समस्ता जनाः ! यं प्रशंसन्ति वेदाः ।
सदा योगिनो यं च ध्यायन्ति मुक्ताः, नराः प्राप्य यं मोदमग्ना भवन्ति ॥१७॥

कामं क्रोधं लोभं मोहं भयशोकौ निरस्य जगदीशः ।
भक्तेभ्यः प्रददाति गुणानां राशिमिन्द्रियजयप्रभृतीनाम् ॥१८॥

निद्रां विहाय रजनीप्रहरे चतुर्थे
ये प्रार्थनास्तुतिमुपासनमारभन्ते ।
इच्छन्ति चोत्तमगुणान् विभवांश्च यान् ते,
सम्प्राप्नुवन्ति पुरुषार्थपरायणास्तान् ॥१९॥

हित्वाखिलं यदि समे परमेश्वरस्य,
सेवापराः सुचरिताः पुरुषा भवन्तु ।
वित्तं यशः प्रतिवसेत् पुरुषेषु तेषु,
नित्यं समीहितनिरन्तरराज्यलक्ष्मीः ॥२०॥

जले निमग्नो वहिरेत्य भूयो
जले निमग्नः पुरुषो यथा स्यात् ।
मग्नं तथात्मानमलं विदध्यात्
मुहुर्मुहुर्ब्रह्मणि मोदरूपे ॥२१॥

यस्योपासनया यशः सुविपुलं पुष्टिर्विमुक्तिस्तथा,
वृद्धिर्हस्तगता भवत्यमरताप्राप्तिश्च संजायते ।
सर्वेषां जगदीश एव मनुजा आराध्यदेवोऽस्ति नः,
त्यक्त्वा तं समुपासनामिह वयं नान्यस्य कुर्वीमहि ॥२२॥

हेमन्ततौं यथा सर्वे पदार्थाः सन्ति शीतलाः ।
तथैव शीतलाः सन्तु समुपास्य समे प्रभुम् ॥२३॥

सेवन्ते सर्वसामर्थ्ययुक्तं ये परमेश्वरम् ।
अधिगत्य समा विद्याः सुखिनः सुधियश्च ते ॥२४॥

उपासनारताः सन्ति सत्यभावेन ये प्रभोः ।
करोति रक्षणं तेषां स सदात्मशरीरयोः ॥२५॥

विहितोपासनो नित्यं दयालुः परमेश्वरः ।
अनुगृह्णाति सततं स्वकीयसमुपासकान् ॥२६॥

मानवाः ! परमात्मा यः सत्याचरणप्रेरणाम् ।
विदधाति सुखं मुक्तेर्ददात्याराध्य एव सः ॥२७॥

दुष्टानि कर्माणि विहाय शुद्धं करोति न स्वं व्यवहारजातम् ।
यावन्न तावत् परमेश्वरं ना लब्धुं क्षमोऽशान्तमनाः कदापि ॥२८॥

जीवेश्वरयोरैक्यं मतमेतज्ज्ञानहीनानाम् ।
ऋषिमुनिविदुषामेतज्ज्ञानवतां विद्यते नैव ॥२९॥

जीवो विभुर्नास्ति विभुर्यदि स्यात्, जनिः कथं जागरणं कथं स्यात् ।
कथं सुषुप्तिर्गतिरागतिः स्यात् स्वप्नं कथं स्यान्मरणं कथं स्यात् ।।३०।।

अल्पश्च सूक्ष्मोऽस्त्यत एव जीवः, न वेत्ति सर्वं परमेश्वरश्च ।
व्याप्तोऽखिले सूक्ष्मतरस्ततोऽपि जीवे प्रकृत्यामखिलस्य वेत्ता ।।३१।।

जीवो भवेद् ब्रह्म कथं न स स्यात् तद्वत् क्षमः सृष्टिविधौ प्रजानाम् ।
मिथ्यास्ति मिथ्यात्वमतो जगत्याः, ऐक्यं च जीवस्य जगन्नियन्तुः ।।३२।।

भूतो न भावी च कदापि योगी, सृष्टेर्विधानं परिवर्तयेद् यः ।
पश्येत् श्रुतिभ्यां शृणुयाच्च दृग्भ्यामतो न जीवः परमेश्वरोऽस्ति ।।३३।।

देही न जीवो जगदीश्वरोऽस्ति स्वप्नेऽपि यो नैव बिभर्ति देहम् ।
जगत्पतेः कर्मगुणस्वभावाः, जीवे घटन्ते न यतः कदापि ।।३४।।

विहाय ज्ञानं समुपासनां च ये केवलं कर्मरता मनुष्याः ।
निजस्वरूपं न विदन्ति, ब्रह्म विदन्ति त्रय्यां निरताः स्वरूपम् ।।३५।।

नाम्नां प्रभोरर्थमवेक्ष्य नैजान् करोति ना कर्मगुणस्वभावान् ।
यदानुकूलान् परमेश्वरस्य तेषां स्मृतिः सा वरदास्ति नाम्नाम् ।।३६।।

आयान्तु बान्धवा कुर्मो दुःखानां क्षतये वयम् ।
मिलित्वा विजयावाप्त्यै प्रसन्नं परमेश्वरम ।।३७।।

विवेकशून्या अजितेन्द्रिया ये
धर्मेण हीना अबुधा जगत्याम् ।
भक्त्या विहीनाः परमेश्वरस्य,
वर्षैरसंख्यैर्न तमाप्नुवन्ति ।।३८।।

परितः परमेश्वरं विभुं वहिरन्तः स्वहृदावगत्य ना ।
रहितः खलु शंकया सदा पुरुषार्थी मुदितोऽभयो भवेत् ।।३९।।

महादयालुः परमेश्वरोऽतः ये तस्य लब्ध्यै विहितप्रयत्नाः ।
कायेन वित्तेन हृदा च भक्त्या तमाशु तेऽनन्तमवाप्नुवन्ति ।।४०।।

यथेश्वरोऽनुगृह्णाति परोपकृतिकारकान् ।
तथाऽस्माभिरनुग्राह्याः समस्ताः प्राणधारिणः ।।४१।।

यथा न जायते सूर्यदर्शनं रश्मिभिर्विना ।
सम्यग् ज्ञातैर्विना वेदैर्न तथा परमात्मनः ॥४२॥

अर्हन्ति मानवा एव सम्प्राप्तुं परमेश्वरम् ।
ज्ञानवृद्धिस्वभावा हि यतस्ते सन्ति भूतले ॥४३॥

स्वस्मै परस्मै शास्त्राणां विज्ञानसहिता मतिः ।
याचितव्या यथाकालं समस्तसुखसाधिका ॥४४॥

प्रार्थनीयः प्रभुः सर्वैरेवं हे जगदीश्वर ।
अधर्मान्मोचयित्वा नो धर्ममार्गे नियोजय ॥४५॥

स्वपूर्णपुरुषार्थस्य पश्चादुत्तमकर्मणाम् ।
सिद्ध्यै सामर्थ्यसाहाय्ययाचना सेऽस्ति प्रार्थना ॥४६॥

स्वप्रकाशयुतो हृत्सु रमतां नः प्रभो तथा ।
नरो यथात्मनो गेहे ज्ञानानन्दविवृद्धये ॥४७॥

इष्टदेवं नरो योऽन्यं विहाय परमेश्वरम् ।
मन्यते, भाग्यहीनः स लभते दारुणां व्यथाम् ॥४८॥

भाग्यहीना नरा येऽखिलैश्वर्यदम्,
वन्दनीयं यशोदं जगद्धारकम् ।
तुत्यमीशैरुपास्यं परित्यज्य तम्,
शिक्षकं कुर्वते हा ! परोपासनाम् ॥४९॥

वृत्तीरखिलदोषेभ्यो निवार्य मनसः स्थिराः ।
कृत्वा शुभगुणेष्वस्ति योगो मुक्तेरधिग्रहः ॥५०॥

योगाभ्यासनिमग्नानां नृणामात्मसु भासते ।
सत्यभावेन धर्मस्यानुष्ठानानन्तरं प्रभुः ॥५१॥

शिवनामास्ति कल्याणकारीशस्तमहं वृणे ।
न विश्वसिम्यहं किन्तु पूजिते पार्वतीपतौ ॥५२॥

साधुभिः पण्डितैश्चैवालस्यमग्नैर्निरन्तरम् ।
मायावादस्य दम्भोऽयं निर्मितो लोकवञ्चकैः ॥५३॥

धर्मकर्मविहीनास्ते संसारहितवर्जिताः ।
ब्रह्मानुभूतिरहिता वदन्ति वितथं सदा ॥५४॥

अहं ब्रह्मास्मि मिथ्यैतज्जगदस्ति परं न ते ।
ब्रह्मत्वं स्वस्य लोकस्यानुभवन्ति च स्वप्नताम् ॥५५॥

पूजा पिपीलिकानां मे श्रेष्ठास्ति शिवपूजनात् ।
दत्तं पिपीलिकाऽदत्ते वटिकेयं शिवस्य न ॥५६॥

नान्यः कश्चिन्नियन्तास्ति विहाय परमेश्वरम् ।
संसृतौ विद्यमानस्य नियमस्यास्य सर्वतः ॥५७॥

सत्योऽभेदः यतः सर्वव्यापकः परमेश्वरः ।
सत्यो भेदो यतो जीव एकदेशस्थितोस्त्यणुः ॥५८॥

एवं स्थिते विवादो यो विद्यतेऽभेदभेदयोः ।
मिथ्यात्वं निश्चितं तस्य तमस्तोमस्य भाववत् ॥५९॥

पितृवत् सुखिनो भक्तान् करोति परमेश्वरः ।
केवलं हेतुरत्राऽस्ति तस्यैवाहैतुकी कृपा ॥६०॥

वियत् सूक्ष्मतरः सर्वव्यापकः परमेश्वरः ।
अगोचरोऽस्त्यतः सर्वजनानां चर्मचक्षुभिः ॥६१॥

अधिका यावती प्रीतिर्भविष्यति परात्मनि ।
तावान् तस्याः प्रकाशस्तु सत्वरं व्यक्तिमेष्यति ॥६२॥

पापानां वर्धकः सिद्धः परमात्मा भविष्यति ।
क्षमां दास्यति पापिभ्यो दयार्द्रहृदयो यदि ॥६३॥

कुरुते न कृपां यावत् प्रीतिमान् परमेश्वरः ।
तावत् तस्मिन् न विश्वासो मानवस्योपजायते ॥६४॥

व्याप्ता यथा वियति धूलिकणा भवन्ति,
दृश्या गवाक्षगतभास्कररश्मिजालैः ।
पूर्णस्तथैव परितः परमेश्वरोऽपि
हृन्मन्दिरे भवति केवलध्यानदृश्यः ॥६५॥

खाग्निवाय्वादयो व्याप्ता एकस्मिन्नुपले यथा ।
तथैव परमात्मापि व्याप्तो निखिलवस्तुषु ॥६६॥

सूक्ष्मः स्थूलपदार्थेषु व्याप्तो भवति विश्वतः ।
अतः सूक्ष्मतमो व्याप्तः सर्वत्र परमेश्वरः ॥६७॥

वेदाः वेदाध्ययनं च

यथार्थविद्याभ्युदयः सुखानां लाभो बुधत्वं पठनेन येषाम् ।
यथार्थतो यैः सदसद्विवेको वेदा ऋगाद्याः कथितास्त एव ॥६८॥

वेदेषु विद्याः सकला यथार्था अतस्तदीयाध्ययनं श्रुतिश्च ।
तत्पाठनं श्रावणमस्ति श्रेष्ठो महीतले पावन आर्यधर्मः ॥६९॥

वेदविद्यां ग्रहीतुं यतन्तां समे मानवाः स्यादरीणां निवृत्तिर्यतः ।
मूर्खताया विनाशो भवेत् सम्भवेत् उन्नती राज्यवृद्ध्यै बुधानां सदा ॥७०॥

वाणी प्रभोर्वेदचतुष्टयी या ज्ञानाय तस्यास्तदनुग्रहस्य ।
वाञ्छा विधेया सकलैर्मनुष्यैः कार्यस्तथा सन्ततमेव यत्नः ॥७१॥

प्रजाजना राजजनाश्च ये स्युः, आज्ञां परित्यज्य प्रभोश्च वेदान् ।
इच्छानुकूलं निरताः प्रवृत्तौ, अधोगतिः स्यान्नु कथं न तेषाम् ॥७२॥

केवलं वेदवेत्तारो धर्माधर्मविदो जनाः ।
अधर्मत्यागतो धर्मात् सुखिनो भवितुं क्षमाः ॥७३॥

उपदिशत्यखिलान् मनुजान् प्रभुर्हितकरी वरदा मम भारती ।
सकललोककृतेऽस्त्यधिकारिणः मम मताः पठने श्रवणेऽखिलाः ॥७४॥

सकललोकप्रियोऽस्ति यथा सदा सकलगः समतासहित विभुः ।
यदि भवन्तु समे समतायुतः भवतु सिद्धिरलं वशवर्तिनी ॥७५॥

कृपाकारकः पितृवत् प्राणिमात्रहितेप्सुः प्रभुः सर्वविद्यागमाय ।
सदा कल्पकल्पस्य प्रारम्भकाले करोति स्वयं सर्ववेदोपदेशम् ॥७६॥

सम्पूर्णसत्यविद्यानां प्रदात्री वेदभारती ।
मानवेभ्यः समस्तेभ्यः परमानन्ददायिका ॥७७॥

सुखान्यनेकानि प्रसारयन्ति ते मानवाः पूर्णवसुन्धरायाम् ।
भवन्ति वेदाध्ययने रता ये सेवाविधाने जगतीपतेश्च ॥७८॥

अध्यापनं चाध्ययनं श्रुतीनां विधाय सर्वे मनुजा जगत्याम् ।
विज्ञाः समुद्योगपरायणाश्च भूत्वा नितान्तं सुखिनो भवन्तु ॥७९॥

विद्याविहीनः पुरुषोऽन्धतुल्यो न चास्ति वेदाध्ययनं विना सा ।
शास्त्राण्यतो वेदयुतानि सार्थं पठन्तु सर्वे पुरुषाः सदैव ॥८०॥

वेदा न नश्यन्ति कदापि नित्या ज्ञाने स्थिताः सर्वजगन्नियन्तुः ।
बीजेऽङ्कुराः सन्निहिता यथा च पूर्वंश्च पश्चात्तरुतामुपेताः ॥८१॥

सृष्ट्यादिकालेऽपि जगद्विधाता वेदोपदेशं यदि नाकरिष्यत् ।
जनाय धर्मादि यथार्थज्ञानमद्यापि कस्मा अपि नाभविष्यत् ॥८२॥

सत्यमस्ति यदिहाक्षिगोचरं कर्णगोचरमथापि तत् समम् ।
यत्र तत्र श्रुतितोऽस्ति विस्तृतं नानृतं निखिलजीवनं हि तत् ॥८३॥

केचिद् वदन्ति मनुजाः श्रुतिषूपदिष्टा
पूजास्ति भास्करनिशाकरयोस्तथाच ।
अन्यस्य भूतनिवहस्य परं तदीयं
तथ्यैर्विहीनमिदमस्ति वचोऽप्रमाणम् ॥८४॥

वेदा अनन्तविद्यानामधिकरणान्यतो न ते ।
मनुष्यनिर्मिताः सन्ति सन्तीश्वरविनिर्मिताः ॥८५॥

सुगमा रचना भाषा लावण्यसमलंकृता ।
राहित्यं पक्षपातस्य सत्यता चैकवाक्यता ॥८६॥

सर्वविद्यानिधानत्वं यतो वेदेषु केवलम् ।
अतस्ते रचिताः सन्ति सर्वज्ञपरमात्मना (युग्मकम्) ॥८७॥

विचारिताः सन्ति मया समस्ता मन्त्राः श्रुतीनां सुसमाहितेन ।
सम्यक् परं युक्तिविरुद्धता न कुत्रापि मे दृष्टिपथं प्रयाता ॥८८॥

सूर्यादिकं यस्तु सहायतार्थं विनिर्ममे मानवलोचनादेः ।
ज्ञानं न दद्यात् स मतेर्नराणाम् सम्भाव्यमेतत् किमु सर्गकाले ॥८९॥

अहं शंखासुरं हत्वा प्रमादालस्यरूपिणम् ।
आनीतवांश्चतुर्वेदान् इमान् जर्मनदेशतः ॥९०॥

पुस्तकानि समस्तानि पूरितानि दुराग्रहैः ।
मतानां सन्ति संसारे नैकं विश्वासभाजनम् ॥९१॥

ज्ञानस्य पुस्तकं सत्यं मतौ मम तु तन्मतम् ।
पक्षपातस्य लेशोऽपि यस्मिन्नैव क्वचिद् भवेत् ॥९२॥

सृष्टिक्रमानुकूलत्वं पुस्तकस्येदृशस्य तु ।
अद्यावधि मया यावत् कृतमन्वेषणं खलु ॥९३॥

वेदा एव मया प्राप्ता ग्रन्था ईदृग्विधा भुवि ।
कस्यापि नैव देशस्य भाषायां सन्ति ते यतः ॥९४॥

ज्ञानपूर्णास्तथा ज्ञानभाषायां रचिताः समे ।
विश्वासयोग्या लोकानां सन्त्येषा मामकी मतिः ॥९५॥

धार्मिकाः; विद्वांसः

ये श्रेष्ठकर्मसु जना अलसा न लग्नाः
ये नाचरन्ति ऋतमेव बुधा विबुध्य ।
सत्यं तथा च यदसत्यमिदं समस्तं
धर्मेण ते विरहिता उभयेऽपि सन्ति ॥ ९६ ॥

अन्याययुक्ता न परान् निहन्ति स्वप्नेऽपि नान्यायमिहाचरन्ति ।
कीर्त्या श्रिया ते विभवेन युक्ता भवन्ति भूमौ मनुजाः समस्ताः ॥९७॥

ये मानवा निजशुभाचरणैर्भवन्ति
शिष्टास्तथोर्ध्वगतयो भुवि ते विमुक्ताः ।
अज्ञानपाशनिगडाज्जटिलाल्लभन्ते
आसृष्टिकालममलं यशसः समूहम् ॥९८॥

वचो ज्ञानानुगं यस्य क्रिया च वचनानुगा ।
धरण्यां मानवेन्द्रस्य तस्य ज्ञानं सुशोभते ॥९९॥

धर्मार्थकामानधिगत्य मुक्तिं लब्ध्वा च सम्यक् परिपूर्णकामः ।
आनन्दरत्नाकरसंनिमग्नो ना मोदते सोऽतिरां सदैव ॥१००॥

बन्धून् प्राप्य सहायतां भुवि परां लोका लभन्ते यथा
कूपं मिष्टजलञ्च प्राप्य तृषितास्तृप्तिं लभन्ते यथा ।
वेदाज्ञां परमेश्वरस्य विधिना सम्पादयन्तो नराः
मुक्तिं प्राप्य तथैव मोदभरिता मोदाम्बुधौ शेरते ॥१०१॥

श्रेष्ठा धर्मरता सत्यविद्यादिगुणसंयुताः ।
उपकारव्रता आर्या आर्यावर्तैकवासिनः ॥१०२॥

सर्वेभ्यः सुखवर्षां ये कुर्वन्ति घनवज्जनाः ।
उदारास्ते सदेप्सन्ति विद्या द्रव्यं च शंकरम् ॥१०३॥

सर्वोपकारकरणाय यथा पदार्थाः
सन्तीश्वरेण रचिताः वसुधाद्यनन्ताः ।
तद्वत् सदा व्यवहरन्तु बुधाः समस्ताः
सर्वोपकारकरणाय विहाय स्वार्थम् ॥१०४॥

रविचन्द्रप्रकाशसन्निभो विदुषां कर्णगुहागतः शुभः ।
उपदेशचयः प्रकाशितं कुरुते मानससद्म निर्मलम् ॥१०५॥

ज्ञानवृद्धिर्मनुष्याणां नोपदेशं विनास्त्यतः ।
दानं तच्छ्रवणं कार्यं तस्मात् सर्वैरहर्निशम् ॥१०६।

यज्ञे हुतं यथा द्रव्यं शुद्धं वायुजलादिकम् ।
उपदेशः सतां तद्वदात्मानं कुरुतेतराम् ॥१०७॥

धर्मार्थकाममोक्षाणां मार्गान् जानन्ति ये जना ।
तेऽन्यानुपदिशेयुर्न ज्ञानहीनाः परे नराः ॥१०८॥

ये पाठका बुधजना उपदेशकाश्च,
धर्मावलम्बनपराः स्वयमेव भूत्वा ।
कुर्वन्ति धर्मनिरतानपरानपीह
तेभ्योऽधिकोऽस्ति भुवि मानवभूषकः क ॥१०९॥

विस्तारयन्निजप्रकाशमलं यथा खे
सूर्यः करोति विमलः सततं विहारम् ।
तद्वद् भवे भव विहारपरो विकासम्,
कुर्वन् सदा सदुपदेशक, धर्मबुद्धेः ॥११०॥

धर्माचरणसंयुक्ता विद्याविनयभूषिताः ।
उत्तमा मानवा ज्ञेयास्तेऽनेकेषु नरेष्विह ॥१११॥

अरादिभिर्यथाचक्रं शोभतेऽतितरां तथा ।
मनुष्या भुवि शोभन्ते विविधैरुत्तमैर्गुणैः ॥११२॥

ईशभक्तिरताः सर्वे सुखिनः सन्तु मानवा ।
प्रचारकार्ये संलग्नाः मार्गाणां ज्ञानधर्मयोः ॥११३॥

स्वयं कुर्यात् सदा विद्वान् परैस्तत् कर्म कारयेत् ।
निवृत्तिर्येन दोषाणां वृद्धिर्बुद्धिबलायुषाम् ॥११४॥

दुष्टबुद्धीन् सुबुद्धीन् ये कुर्वन्ति विबुधास्तथा ।
श्येनवद्दुष्टनाशं ते जनाः कल्याणकारिणः ॥११५॥

सत्यप्रकाशका धूमयोनिवत् पापनाशकाः ।
यशस्विनो नरा दुष्टरोदकाः श्रेष्ठपालकाः ॥११६॥

त एव सन्ति विद्वांसो संसारहितकांक्षिणः ।
प्रसारयन्ति ये विद्यां सर्वत्र जगतीतले ॥११७॥

ऐश्वर्यवृद्धिमन्येषां ये कांक्षन्ति समागतान् ।
दृष्ट्वैश्वर्यवतो हृष्टा दयावन्तो नराश्च ते ॥११८॥

सर्वेषां रक्षणं शक्त्या बुद्धिशक्तिधनान्विताः ।
मानवा ये प्रकुर्वन्ति पारेदुःखं प्रयान्ति ते ॥११९॥

मनसा कर्मणा वाचा बुधा ये सत्यपालकाः ।
ते देवा विपरीताश्च राक्षसाः परिकीर्तिताः ॥१२०॥
ईश्वरस्य च यज्ज्ञानं तदाज्ञानाञ्च पालनम् ।
देवत्वाख्यां तदेवास्मिन् भजते जगतीतले ॥१२१॥
ये बुधा धर्मकार्येषु प्रेरयित्वा जनान् समान् ।
बुद्धियुक्तान् प्रकुर्वन्ति ते धन्याः सन्ति भूतले ॥१२२॥
आचरन्ति सदा धर्मं ये ते सर्वत्र संसृतौ ।
भूत्वा यशस्विनो यान्ति प्रसिद्धिमतुलां पराम् ॥१२३॥

परोपकारे निरता जना ये
भवन्ति धर्मैकधना जगत्याम् ।
भवन्ति ते नैव भयाभिभूताः
कदापि कुत्रापि कथञ्चिदस्याम् ॥१२४॥
मनः शरीरं द्रविणं च येषां
समस्तसंसारसुखाय जातम् ।
स्तुत्याः समस्ते जगतीतले ते
परोपकारे निरता भवन्ति ॥१२५॥

कुर्वन्ति मानं विश्वासं धार्मिकस्यारयोऽप्यलम् ।
सुहृदोऽपि न स्वप्नेऽपि धर्महीनस्य कुर्वते ॥१२६॥

पथ्याशिनो धर्मपरायणांश्च
प्रभोः पदार्थाः सुखयन्ति सर्वे ।
पापं कुपथ्यं विदधत्यजस्रं
ये ते सदा दुःखमवाप्नुवन्ति ॥१२७॥

प्रकाशयति हर्म्याणि यथाग्निर्दीपकादिभिः ।
तथैव धार्मिका लोका धर्मेण स्वकुलान्यलम् ॥१२८॥
निवारणं विपत्तीनां धृत्या धीमत्तया तथा ।
आप्तानामस्ति कर्तव्यं नराणां विपदागमे ॥१२९॥
बुधानां धर्मयुक्तानां साहाय्येन नरा भुवि ।
कर्तुमर्हन्ति श्रेष्ठानि कार्याणि सुमहन्ति च ॥१३०॥

सत्याचरणसम्पन्ना उपकारपरायणाः ।
ये ते जगति गण्यन्ते धर्मात्मसु नराः सदा ॥१३१॥
शरीरे घोरकर्माणि रागद्वेषौ मनःसु न ।
सेवकानां प्रभोर्येषां ते न नश्यन्तु धार्मिकाः ॥१३२॥
कृपापात्राणि संभूय धार्मिकाः परमात्मनः ।
लभन्ते विजयं, दुष्टा मानवा नैव जात्वपि ॥१३३॥
कुर्वन्ति व्यवहारं ये मित्रवत् सर्वदा समैः ।
धर्मात्मनां त एवात्र प्राप्नुवन्ति पदं नराः ॥१३४॥
पाठमात्रविदः श्रेष्ठा अजानद्भ्यो नराः परम् ।
सर्वोत्तमस्तु वेदार्थवेत्ता तद् विधिकारकः ॥१३५॥
परोपकारं कुर्वन्ति यथार्केन्दुधरादयः ।
जायन्तां मानवास्तद्वत् सदा परहिते रता ॥१३६॥
विरोधभावनां त्यक्त्वा परार्थनिरता नराः ।
यदा भवन्ति जायन्ते सपत्नाः सुहृदस्तदा ॥१३७॥
परोपकृतिकारिभ्यो नृभ्यो द्रुह्यति यो नरः ।
दुःखीयति सदा सोऽत्र यः स्निह्यति सुखीयति ॥१३८॥
परमार्थप्रियाः सन्तः सन्तप्ता अपि संसृतौ ।
विसृजन्त्युपकारस्य करणं जातुचिन्नहि ॥१३९॥
दुष्टाचारान् नरान् रोगान् शत्रूंश्च विनिवार्य ये ।
सुखं ददति सर्वेभ्यो जगत्पूज्या भवन्ति ते ॥१४०॥
अहंकारजितो नास्ति कदापि पुरुषो महान् ।
अहंकारविजेतैव मन्तव्यः पुरुषो महान् ॥१४१॥
विद्वद्भ्यो यः समादत्ते विद्याधनमनुत्तमम् ।
सुशीलतां तथा ज्ञेयः स एव पुरुषो महान् ॥१४२॥
दाता निरन्तरं योऽस्ति नादाता जातुचिन्नरः ।
सत्यस्य शिक्षको ज्ञेयो महान् न परपीडक ॥१४३॥

धार्मिकेषु भवेच्छान्तो दुष्टेष्वग्निभयंकरः ।
नरो धर्मपरो यः स गण्यते शक्तिसंयुतः ॥१४४॥
मृद्भ्यः स्वर्णादिकान् धातून् श्रेष्ठान् भूगर्भविद्यया ।
निष्कास्य मानवाः कुर्युरनाथपरिपालनम् ॥१४५॥
विचारशीला वेदानां वेत्तारः पुरुषार्थिनः ।
ये त एव नरा लोके लोकालंकृतयो मताः ॥१४६॥
उपकारपराः सर्वसंसारस्योपदेशकाः ।
प्रभुवन्न्यायशीला ये ते नरा लोकभूषणाः ॥१४७॥
युक्ताहारविहारा ये मानवा विजितेन्द्रियाः ।
सर्वर्तुषु लभन्ते ते सुखं पञ्चेन्द्रियैः सदा ॥१४८॥
रोगप्रमादसंहारकारकं बुद्धिवर्धकम् ।
विद्वन् भक्ष सदान्नं त्वं तद्विधं च पयः पिब ॥१४९॥
बुधाः श्रेष्ठस्वभावास्ते यथार्थस्य च भाषकाः ।
श्रियं दत्त्वा परेभ्यो ये स्वयमश्नन्ति भोजनम् ॥१५०॥
बुधाः पठित्वैकान्ते ये तद्विचारं प्रकुर्वते ।
विद्वांसो बुद्धिमन्तस्ते सन्ति योगिसमा भुवि ॥१५१॥
नरा यथार्थवक्तारो गच्छेयुर्येन वर्त्मना ।
तेनैव वर्त्मना यान्तु भवन्तो भद्रकामिनः ॥१५२॥
स्त्रियो नराश्च विद्वांसो धार्मिका गृहवासिनः ।
मुक्तिमुक्ताःफलप्राप्तिमनायासेन कुर्वते ॥१५३॥
आलस्यं ये परित्यज्य यतन्ते शुभकर्मणाम् ।
करणाय श्रिया युक्ता जायन्ते ते न संशयः ॥१५४॥
कामुका लम्पटा नैव वन्दनीया जनाः जनाः !
वन्दनीयाः सुसेव्याश्च धर्मस्याचरणे रताः ॥१५५॥
प्रसन्नचित्ताः सुभगा यथा स्त्रियो
निजान् पतीन् यान्ति प्रमोदनिर्भराः ।

तथैव विज्ञानविभूषिता युता
सुविद्यया वाक् विबुधं निषेवते ।।१५६।।

नियमेन सज्जनानामनृतपरित्यागकारिणीं वाणीम् ।
सन्मार्गगामिनीं ये सेवन्ते नैव तद्धानिः ।।१५७।।

कामधेनुर्यथा कामधुग् जायते
दुग्धदध्यादिना सर्पिषा प्राणिनाम् ।
विद्यया श्रेष्ठया शिक्षया संयुता:
कामधुग् वाक् तथैवास्ति विद्यावताम् ।।१५८।।

छिनत्ति मेघावयवान् यथाशु
विद्युद् विनायासमलं प्रदीप्ता ।
सुशिक्षिता वाक् सुशुभा तथैवा-
विद्यांगजातं समसंशयांश्च ।।१५९।।

लभन्ते विजयं नूनं ते नरा जगदाहवे ।
विरोधं ये न कुर्वन्ति धार्मिकैः मानवैः सह ।।१६०।।

संगोपदेशौ श्रेष्ठानां लब्ध्वा न्यायं निरन्तरम् ।
करोति धर्मयुक्तं यो जयं स लभते नरः ।।१६१।।

छलछद्मविहीना ये धर्माचरणकारिणः ।
विद्यां ददति गृह्णन्ति त एव सुखिनो नराः ।।१६२।।

उत्पतन्तो यथाशक्ति खे पक्षिणो
यान्त्यपारस्य पारं न व्योम्नः क्वचित् ।
एवमेवात्र लोके क्षमा मानवा:
सन्ति लब्धुं न ज्ञानस्य पारंपरम् ।।१६३।।

अधर्माचरणं कार्यं विद्वद्भिर्न कदाचन ।
दातव्यश्चोपदेशोपि परेभ्यस्तत्कृते च न ।।१६४।।

साधयन्ति सुखोत्कर्षौ सुहृदां सुहृदो यथा ।
तद् वत् सर्वसुहृद् विद्वान् स्यात् सर्वसुखदायकः ।।१६५।।

अग्निर्यथा दहति सर्वतृणानि तूर्णं
माद्र्राण्यपीह ज्वलितात्मशिखोःचयेन ।
तद्वद् बुधा अपि विनाश्य समस्त दोषान्
कुर्वन्तु नो गुणगणैः सहितान् समस्तान् ॥१६६॥

सत्योपदेशैर्विद्वांसो कृत्वा सर्वान् जनान् पृथक् ।
असत्याचरणात् कुर्युर्धार्मिकान् सत्परायणान् ॥१६७॥

अनुगच्छति गां वत्सो यथा तद् वद् बुधान् समे ।
अबुधा यान्तु कुर्वन्तु वशगानीन्द्रियाणि च ॥१६८॥

नान्योन्यहानिं कुर्वन्तु कृत्वेर्ष्यां विबुधा जनाः ।
प्रीत्या परस्परं सर्वे स्युः समुत्कर्षकारकाः ॥१६९॥

कायेन वाचा मनसा धनेन करोति सेवां विदुषां जनो यः ।
अवाप्य विद्यां लभते स मुक्ति भुक्त्वा पृथिव्या असपत्नराज्यम् ॥१७०॥

सर्वस्य जगतो विद्वान् उपकारपरायणः ।
अपकारमरीणां स विदधाति न जात्वपि ॥१७१॥

विदुषां प्रशंसनीयं कार्यमिदं केवलं जगति ।
पापस्य खण्डनं यत् यन्मण्डनमस्ति धर्मस्य ॥१७२॥

व्यवहारं यथायोग्यं कृत्वा दुःखस्य सागरात् ।
तारायाज्ञानिनां विद्वान् दृढनौकासमो भवेत् ॥१७३॥

विरलः स जनो लोके विज्ञाय परमेश्वरम् ।
उपदेष्टास्ति सत्यस्य तदाज्ञामनुसृत्य यः ॥१७४॥

पावना बुद्धिमन्तो ये वेदशास्त्रविदश्च न ।
करिष्यन्ति कथं तेऽन्यान् सुधियः पावनान् बुधान् ॥१७५॥

त आर्या ये नरा नैव मन्दा आलस्य संयुताः ।
तस्कराश्च, प्रकाशन्ते ते भासा भास्करोपमाः ॥१७६॥

अन्यायेनान्यहिंसां ये न कुर्वन्ति नरा भुवि ।
धर्माधाराः सुपुष्टास्ते लभन्ते विजयश्रियम् ॥१७७॥

यो विनम्रः सुशीलश्च वृद्धानां विदुषां तथा ।
सेवको, वर्धते तस्य कीर्तिरायुर्बलं मतिः ॥१७८॥
धर्मोपदेशका यावत् क्षमावन्न क्षमान्विताः ।
सहिष्णवश्च तावत् ते न स्युर्धर्मोपदेशकाः ॥१७९॥
विरुद्धबुद्धिमुत्पाद्य भ्रमं च मनुसन्ततौ ।
मिथो विनाशकरणं स्वभावो विदुषां नहि ॥१८०॥
जितेन्द्रियो धर्मपरायणो यो विद्वान् सतां संगतिकारकश्च ।
योगी सुशीलः पुरुषार्थयुक्तो, लोके परेऽस्मिंश्च स मोदते ना ॥१८१॥

कर्तव्यम्

अनलसाः पुरुषाः पृथिवीतले विबुधसंगतिलाभपरायणाः ।
सुनिरताः शुभकर्मसु सन्तु चेत् विलयमेष्यति तर्हि दरिद्रता ॥१८२॥
कुर्वन्ति कर्माणि शुभानि नित्यं तथा च दुष्टानि परित्यजन्ति ।
सन्तो यथा सर्वजनास्तथैव कुर्वन्तु मूर्खाननु नाचरन्तु ॥१८३॥
ईर्ष्येत् जातु न कस्मैचिन्नरो वित्तमदान्वितः ।
वृद्धिं परस्य संवीक्ष्य स्यादानन्दयुतः सदा ॥१८४॥
संसारे वृद्धिमाप्नोति विविधां मानवो रतः ।
सर्वेषां हितकार्येषु नेर्ष्यायाः कारकः क्वचित् ॥१८५॥
संसारे वित्तवन्तो ये ते वित्तरहितान् नरान् ।
संयोज्य विविधोद्योगे पालयन्तु निरन्तरम् ॥१८६॥
ईर्ष्याद्वेषौ परित्यज्य सर्वैरेव नरैः सदा ।
अन्योन्यस्य सुखोन्नत्यै चेष्टितव्यं प्रयत्नतः ॥१८७॥
न केवलं निजोन्नत्या सन्तुष्टः पुरुषो भवेत् ।
समेषामुन्नतावेव ज्ञातव्या स्वसमुन्नतिः ॥१८८॥
विद्या तथोत्तमा शिक्षा सन्तत्यै हितकारिणी ।
यादृशी तादृशो नास्ति क्रियान्या कापि भूतले ॥१८९॥
धर्म्याणि कार्याणि यथा विदध्युः बुधास्तथैवाखिलभूतसंघाः ।
समे च भूत्वैकधियो धरित्र्यां विद्यासुखोत्कर्षविधायकाः स्युः ॥१९०॥

विद्वज्जनवदसत्यखण्डनं कृत्वा मानव धारय सत्यम् ।
हित्वाऽविद्यां विद्यां धृत्वा सततं पालय निजकर्तव्यम् ।।१९१।।

संपाल्य मानव ! विभोः परमेश्वर-
स्यादेशं समस्तशुभकामसुपूरकस्य ।
कृत्वा श्रमं कुरु शरीरबलस्य चेतःशुद्धेः
श्रियोऽतिमहतीं पठनस्य सिद्धिम् ।।१९२।।

सम्यक् विमृश्य कार्याणि कर्माणि मनुजैः सदा ।
यानि कान्यपि कार्याणि दृढोत्साहसमन्वितैः ।।१९३।।

श्रेयस्कराणि कार्याणि शिक्षितव्यानि मानव !
दुरुदर्काणि दुष्टानि न स्वप्नेऽपि कदाचन ।।१९४।।

यानि बन्धनकारीणि पापकर्माणि दूरतः ।
तानि हित्वा विधेयानि पुण्यकर्माणि सर्वदा ।।१९५।।

विधातुं यानि कर्माणि परमात्मा बुधाऽथवा ।
समादिशेत् विधेयानि तानि हेयानि सन्त्यजेत् ।।१९६।।

निष्फला याः क्रियास्ता न विधेया जातु मानवैः ।
धर्मार्थकाममोक्षाणां विधेया याश्च साधिकाः ।।१९७।।

यशोवर्धकं धर्मयुक्तं सदैव त्वया कर्म कार्यं विदग्धाग्रगण्य ।
भवेद् येन प्राप्तं भवे भूरि भूरि सुखं सर्वतो दुःखलेशेन हीनम् ।।१९८।।

आज्ञैषा परमेश्वरस्य मनुजो यावच्च जीवेद् भुवि,
तावत् श्रेष्ठक्रियाकलापनिरतो रात्रिन्दिवं जायताम् ।
जीवेद् वर्षशतं परं न महतोऽरातेर्वशं जातुचिद्,
आलस्यस्य भवेद्, भवेद् यदि भवे कल्याणकांक्षा हृदि ।।१९९।।

यथा स्वस्मै तथान्यस्मै सुखमिच्छेत् सदा नरः ।
दुःखेच्छा न परस्मै स्यान्न तदिच्छा यथात्मने ।।२००।।

बलवृद्धिं यथा स्वस्य कामयन्तेऽखिला जनाः ।
वृद्धिमन्यबलस्यापि कामयन्तां तथैव ते ।।२०१।।

कामना कमनीया या निजकल्याणकांक्षिणा ।
न जातु संपरित्याज्या सा सर्वहितकारिणी ।।२०२।।

कुपथ्यं न नरः कुर्यात् पापस्याचरणं तथा ।
शारीरो मानसो वापि रोगो जायेत येन न ।।२०३।।

अधर्मात्मभिः पक्षपातेन युक्तैः
जनैरल्पविद्भिः कृताः क्षुद्रधीभिः ।
असत्यं वदद्भिर्विरुद्धा श्रुतिभ्यो
न मान्याः प्रमाणैर्विहीनाश्च ग्रन्थाः ।।२०४।।

धृत्वा मनुष्यस्य शरीरमत्र विद्यां सुशिक्षां मधुरं स्वभावम् ।
धर्मं च भोगं विधिवद्गृहीत्वा यतस्व मुक्त्यै सफलश्च भूयाः ।।२०५।।

धार्मिकेषु पुरुषेषु विधेयो नास्त्रपातनविधिर्विधिवर्ज्यः ।
दुर्जनेषु पुरुषेषु विधेयः सौख्यवृद्धिकरणाय ध्रुवं सः ।।२०६।।

आचारमसतां त्यक्त्वा संगेन विदुषां नराः ।
आराधनेन धर्मे स्युः प्रवृत्ताः परमात्मनः ।।२०७।।

दुःखं दत्वा न कस्मैचित् सुखस्यानुभवं कुरु ।
सुखिनः सकलान् कृत्वा विद्धयात्मानं सुखैर्युतम् ।।२०८।।

मनुष्याः यत्र कुत्रापि गन्तुमिच्छथ गच्छथ ।
नीतित्यागः परं क्वापि विधेयो नायशस्करः ।।२०९।।

अर्जयन्ति यथा वित्तं धार्मिका मानवास्तथा ।
अर्जयेयुः समे धर्ममाचरन्तो जना धनम् ।।२१०।।

धनाढ्या मानवाः सन्ति ये केऽपि वसुधातले ।
धर्मस्तेषां दरिद्राणां पालनं परमः स्मृतः ।।२११।।

कृतं न जायते कर्म जगत्यां जातु निष्फलम् ।
एवं मत्वा रुचिर्धर्मेऽधर्मे धेयाऽरुचिः सदा ।।२१२।।

निजात्मनः समुन्नत्यै भीतोऽधर्मात् भवेत् सदा ।
स्थितश्च निश्चलं धर्मे श्रेयस्कामो भवेत् सदा ।।२१३।।

आचरन्तः स्वकं धर्मं त्यक्त्वा पापांश्च दूरतः ।
साधयेयुश्चतुर्वर्गमीशोपासनया भृशम् ।।२१४।।

ईशसृष्टौ यथा स्वीये मार्गे सूर्यादयो गतिम् ।
कुर्वन्ति कुर्वतां तद्वत् मानवा धर्मवर्त्मनि ।।२१५।।

साम्राज्यमिच्छेदनृतेन लब्धं स्वप्ने न धर्माचरणं विहाय ।
गच्छन्ति गच्छन्त्वसवः परं न त्याज्योऽस्ति धर्मः सुखदुःख हेतोः ॥२१६॥

कुर्युरारोग्यबिस्तारं यथायोग्याशनैर्नराः ।
श्रमैश्च विविधैः स्वीयपरोपकृतिसिद्धये ॥२१७॥

विधेयं हिंसनं नैव गवादिप्राणधारिणाम् ।
न च कारयितव्यं तद् दद्यान्नानुमतिं तथा ॥२१८॥

पशूनामुन्नतिं पुष्टिं ये प्रकुर्वन्ति मानवाः ।
अप्रयासं लभन्तेऽत्र विविधानि सुखानि ते ॥२१९॥

पानाशनवन्नित्यं व्यायामो मानवेन करणीयः ।
बली प्रसन्नो मुदितो निःसारो निर्बलो रुग्णः ॥२२०॥

नरा अकृत्वा वलिवैश्वदेवं यज्ञे गृहे येऽशनमाचरन्ति ।
ते मानवा नैव विदन्ति मूढा यत्ते गवां मांसमदन्ति नूनम् ॥२२१॥

बाल्यावस्थाविवाहेन यावान्नष्टो भवेन्नरः ।
ततोऽधिकतरा नष्टा नारी तावद् विजायते ॥२२२॥

केवलं नात्मनः कुर्यान्मानवो बलवर्धनम् ।
परेषामपि तत् कुर्याद् ब्रह्मचर्यादिसाधनैः ॥२२३॥

हिंसातास्कर्यविश्वासविघातसदृशैः समैः ।
कर्मभिः प्राप्य वस्तूनि यो भोगोऽभक्ष्य एव सः ॥२२४॥

अहिंसया तथा धर्मकर्मभिः प्राप्य मानवैः ।
वस्तूनां क्रियते भोगो यो ऽसौ भक्ष्यः प्रकीर्तितः ॥२२५॥

पदार्थैर्यैर्वृद्धिर्भवति बलबुद्ध्योरतितराम्,
विनाशो रोगाणां विलसति च स्वास्थ्यं सुखकरम् ।
भवत्यायुर्दीर्घं फलकुसुमकन्दाज्यपयसां
पदार्थानां भक्ष्यं मितमशनमन्नस्य कथितम् ॥२२६॥

अनादरं कोऽपि बटुर्बुधानां बुधा वटूनां न कदापि कुर्युः ।
भवन्तु सर्वे सुहृदो विहाय क्रोधं तथेर्ष्यादिसमस्तदोषान् ॥२२७॥

पर्याप्तता न वर्षाया रोगाणामल्पता च न ।
रक्षया वनवृक्षाणां विना जात्वपि जायते ॥२२८॥

रक्षकेभ्यो वनादीनां दद्युरन्नादिकं जनाः ।
उन्नतिं च सदा कुर्युरोषधीनां च भूरुहाम् ॥२२९॥

वनस्पतिद्रुमाणां च श्रेष्ठानां तु कदाचन ।
नाशः, कार्यो न कार्यश्च दोषनाशः शुभावहः ॥२३०॥

भो मानवाः ! जगति या त्रिविधास्ति वाणी,
सा सर्वदैव सकलैः पुरुषैर्वरेण्या ।
सत्या तथा सुमधुरातिसुसंस्कृता च,
सद्विद्यया विविधया वरशिक्षया च ॥२३१॥

मनुष्यो मनुष्यः स नैवास्ति लोके,
वशे मानसं चञ्चलं यस्य न स्यात् ।
न वा यस्य वाणी वरेण्या वशे स्यात्
सुधाधारया मानवाह्लादकर्त्री ॥२३२॥

न मानवेन केनापि गोपनीया कदाचन ।
विद्या प्रकाशनीया सा जगद्धितकरी सदा ॥२३३॥

विद्यामवाप्य नान्येभ्यो ये तां यच्छन्ति मानवाः ।
क्षुद्राशययुतास्तेऽत्र भवन्त्यत्यन्तपापिनः ॥२३४॥

सदैव सत्कारपरायणाः स्युः प्रभोर्बुधानां मनुजाः समस्ताः ।
लाभोऽस्तिविद्यासुखयोः परस्मात् यस्मान्न कस्मादपि जीवलोके ॥२३५॥

विद्वद्वदेव कार्याणि कुर्वन्तु निखिला जनाः ।
नाचरन्तु यथा मूर्खा आचरन्त्यविवेकिनः ॥२३६॥

अपृष्टभाषणं ज्येष्ठगोष्ठीषु च विनाज्ञया ।
भाषणं नार्यमर्यादानुकूलं वर्तते यथा ॥२३७॥

पृष्ठदानं तथा मान्यव्यक्तिभ्योऽभिमुखं तथा ।
तेषामनुचितं पादौ प्रसार्य शयनं महत् ॥२३८॥

नरा बाहुबलं पुष्टिमंगानां दुष्टताडनम् ।
न्यायप्रकाशनं चैव सदा कुर्वन्तु यत्नतः ॥२३९॥

असत्यश्रवणं मिथ्याप्रशंसाप्रार्थनास्तुतीः ।
दोषाणां दर्शनं कुर्याद् व्यभिचारञ्च जातु न ॥२४०॥

संगं विहाय मनुजा असतां सतां ये
संगं भजन्ति भुवि ते हि विभूतिमन्तः ।
सिद्धयै नरा अनलसाः सततं यतन्ते
ये ते भवन्ति सुखिनोऽसुखिनः प्रतीपाः ॥२४१॥

धर्मात्मभिः प्रीतिपरायणाः स्युः दुष्टैस्तथा ऽप्रीतिपरायणाःस्युः ।
हृदा च तेषामपि कामयन्तां हितं नराणामसतां मनुष्याः ॥२४२॥

कर्मणा येन येन स्याद् वृद्धिः कायात्मनोः सदा ।
ऐश्वर्यस्य, विधेयानि तानि कर्माणि सर्वदा ॥२४३॥

निघ्नन्तु न नरा जातु गवादीनुपकारकान् ।
यापयन्तु न कालं च व्यर्थं श्रेष्ठैर्मिलन्तु च ॥२४४॥

नराः! सर्वमित्राणि भूत्वा भवन्तु
भवन्तः सदा सौख्यदाधेनुतुल्यम् ।
नदीवन्मलं चाशु कुर्वन्तु दूरे
सुबुद्धिप्रदाः कामनापूरकाश्च ॥२४५॥

देवमन्दिरनिर्माण विचारं परिहाय तु ।
धर्म-कर्मणि कस्मिंश्चित् कुरु स्वीयधनव्ययम् ॥२४६॥

नात्मनो न परस्याथ कल्याणं येन संभवेत् ।
अज्ञानगर्तनिर्माणं निर्माणं मन्दिरस्य हि ॥२४७॥

महर्षिरेकदा तन्तुवायमेकमुपादिशत् ।
सदाचारपरो भूत्वा यापय त्वं स्वजीवनम् ॥२४८॥

वयित्वा देहि तन्तुं त्वं तावत् यावत् समर्पितम् ।
केनापि व्यवहारोऽयं ते कल्याणकरः सदा ॥२४९॥

लघुतां लघवो कुर्युर्यदि त्याज्यं तथापि न ।
स्वमहत्वं महद्भिस्तु क्षम्यास्तु लघवः सदा ॥२५०॥

सन्तत्या वैमनस्यं तु सांसारिकसुखाध्वनि ।
कष्टं ददाति नितरां तीक्ष्णकण्टकवन्महत् ॥२५१॥

मदीयकथनं मत्वा स्वचरित्रं समुन्नतम् ।
परोपकारिणो यूयं यदि सर्वे करिष्यथ ॥२५२॥

शरीरेण वियुक्तोऽपि मनसा चात्मना तथा ।
समीपे भवतामेव भविष्यामि न संशयः ॥२५३॥ युग्मकम्
जडे देहे निजं कार्यं विदधाति जडं ज्वरम् ।
स्वीयं ज्ञानात्मकं कर्म त्यजेयं चेतनः कथम् ॥२५४॥
सत्यासत्यविवेकस्तु मन्दीभूतोऽस्ति साम्प्रतम् ।
तत्सुधारकृते कोलाहलमेतं करोम्यहम् ॥२५५॥
व्यायामः सर्वदा कार्यः सर्वैर्भक्षणपानवत् ।
बलिनः सुखिनः सन्ति बलहीनाश्च दुखिताः ॥२५६॥
जीवनं बलहीनानां सारहीनं निरर्थकम् ।
निकेतनञ्च रोगाणां मतं नरकसन्निभम् ॥२५७॥
द्वेषः शाम्यति न द्वेषैः नानलेन यथानलः ।
शान्त्या जलेन तौ शान्तौ यथाशु भवतः स्वयम् ॥२५८॥
तथापमानकर्त्ता ना नापमानेन जात्वपि ।
सन्मार्गमेति सम्मानदानेनैति न संशयः ॥२५९॥
मिथ्यापक्षमुरीकृत्य विग्रहः प्रतिपक्षिभिः ।
धार्मिकैः पुरुषैः कार्यो न स्वप्नेऽपि कदाचन ॥२६०॥
कस्मैचिदपि दातव्यं नामृतं विषमिश्रितम् ।
सत्यस्य गूहनं पापं सत्यमन्ते विजेष्यते ॥२६१॥
न मया निर्मितं सत्यं तत्सृष्टं परमात्मना ।
मृत्योरपि भयं कार्यं तस्य प्रकटने कथम् ॥२६२॥
वैरं विरोधमुत्सृज्य सत्यासत्यविनिर्णयः ।
विद्यते विदुषां धर्मो नासत्यकटुभाषणम् ॥२६३॥
भवेत् सर्वशुभाकांक्षी विमुक्तो फलचिन्तया ।
विनायासमवाप्नोति साफल्यफलमुत्तमम् ॥२६४॥
मनःस्थैर्यं मतेः शक्तेर्वृद्धिर्व्याधेः क्षयस्तथा ।
प्राणायामविधानेनानायासमुपजायते ॥२६५॥

कदाचिदेकापि कपर्दिकेयं न्यूना हि हानिं महतीं करोति ।
अतो व्यये काणवराटिकाया नासावधानेन नरेण भाव्यम् ।।२६६।।

दयामिच्छन्ति कर्तुं ये मक्षिकामशकादिषु ।
भीरवस्ते रणे प्राप्ते किं करिष्यन्ति मानवाः ।।२६७।।

नैकस्याः खण्डनं मूर्तेः सकले जीवने मया ।
कृतं करोम्यहं किन्तु मूर्तिपूजनखण्डनम् ।।२६८।।

जीवितानां हि पितॄणां श्रद्धाभक्तिसमन्वितः ।
समादरः परो धर्मः सर्वेषां विद्यते नृणाम् ।।२६९।।

कर्तव्यं निजकर्तव्यं मिश्रितैरेषु हिन्दुषु ।
एषु वैदिकधर्मस्य प्रचारोऽपि विधीयताम् ।।२७०।।

निजा इमे न हातव्या घृणावैरपरा अपि ।
स्वधर्मधारणानिष्ठैरन्ते युष्मत्स्वधर्मिणः ।।२७१।।

हृदयानि कठोराणि वयं भारतवासिनाम् ।
मृदूनि कर्तुमिच्छामस्तथाकृष्टान् प्रधावतः ।।२७२।।

उदात्तोद्देश्यमालक्ष्य स्वीयं तेषामनीतयः ।
अत्याचाराश्च सोढव्या अस्माभिः स्नेहसंयुतैः ।।२७३।।

तिलेषु तैलवद् व्याप्तमात्मनीशोऽस्ति सर्वतः ।
आत्मज्ञाने ततो जाते ज्ञायते परमेश्वरः ।।२७४।।

पुरुषो न तिरस्कार्यो जगत्पतिकृतिर्हि सः ।
शिष्टस्तेषु विशेषेण कदाचिदपि केनचित् ।।२७५।।

दुःखनाशः; सुखप्राप्तिः

जीवाः स्वभावेन सुखोपलब्धिं वियोगमिच्छन्ति च दुःखराशेः ।
परं न तावत् सुखिनो न यावत् त्यजन्त्यघं धर्ममथाचरन्ति ।।२७६।।

विद्याशरीरशक्त्योश्च विनोन्नत्या न जायते ।
कदापि सुखसम्पत्तिवृद्धिः संसारवर्त्मनि ।।२७७।।

बलबुद्धिनाशको व्यवहारः बहुविषयासक्तिर्व्यभिचारः ।
यादृशो विद्यते संसारे तादृशः कोऽपि नान्योऽपारे ।।२७८।।

शारीरामात्मिकां शक्ति मानवा ये दिने दिने ।
वर्धयन्त्यरयस्तेषां पलायन्ते भयाप्लुताः ।।२७९।।

भाग्यहीना नरा येऽखिलैश्वर्यदं वन्दनीयं सुसेव्यं जगद्धारकम् ।
स्तुत्यमीशं सुशिक्षाप्रदं प्रेरकं कुर्वते हन्त हित्वा परोपासनाम् ।।२८०।।

आनन्दाम्बुधिमग्नोऽसौ सदा भवति मानवः ।
कठोरभाषणं हित्वा लोके यो मृदु भाषते ।।२८१।।

मद्यादिसेवनान्मुक्तिर्न स्वप्नेऽपि विजायते ।
दुःखावाप्तिर्विनाशश्च ज्ञानस्य भवतश्चिरम् ।।२८२।।

मया परीक्ष्यैव सुनिश्चितं यद् धर्मानुकूलव्यवहारशीलः ।
सुखं सदाप्नोति तथा विरुद्धो दुःखी स्वहानिं कुरुते सदैव ।।२८३।।

योगाभ्यासविधानाद् व्यायामौषधिनिषेवणाच्चैव ।
मनुजाः प्रणाश्य रोगान् सततं सुखिनो भवन्तु नीरोगाः ।।२८४।।

सांसारिकैः पदार्थैः सुखमनवाप्यं सदा विना विद्याम् ।
ईशाराधन—विद्वत्संगाभ्यां तामवाप्य तत् प्राप्यम् ।।२८५।।

विरोधपरिहारेण विना कोऽपि न मानवः ।
परस्परसुखं लब्धुं समर्थो जायते भुवि ।।२८६।।

परित्यज्य प्रभुं नान्यः रक्षकः कोऽपि विद्यते ।
सुखसाधनदाता च ज्ञेयमेतत् सदा जनैः ।।२८७।।

अन्योन्यवृद्धिकार्येषु भवन्ति निरता नराः ।
ये वृद्धिं ते लभन्तेऽत्र सर्वदा सर्वतोमुखीम् ।।२८८।।

ज्ञानस्य सत्याचरणस्य वाञ्छां त्यागस्य चाधर्मकृते जना ये ।
कुर्वन्ति, कुर्वन्ति परोपकारं, धन्या नरास्तत्सदृशा भवेम ।।२८९।।

त्वदीये हृदि यद्यस्ति निजकल्याणकामना ।
विधेहि त्वं ऋजुर्भूत्वा सन्मार्गस्यावलम्बनम् ।।२९०।।

गवां संरक्षणं वेदप्रतिपाद्यविधेस्तथा ।
आवश्यकः प्रचारोऽस्ति जगत्कल्याणसिद्धये ॥२९१॥

प्रणवस्य जपं कुर्यादहोरात्रमतन्द्रितः ।
मानवोऽनुक्षणं योऽयं बुभूषति जितेन्द्रियः ॥२९२॥

यावन्नाल्पीक्रियन्तेऽत्र स्वीयावश्यकता भवे ।
पूर्णस्वतन्त्रतावाप्तिः सम्भाव्या तावदस्ति न ॥२९३॥

आत्मीयैर्मित्रता जातु नैकधर्मादिकं विना ।
विना तां जायते नैव सन्ततं वाञ्छितं फलम् ॥२९४॥

शक्त्यारोग्यप्रदं खाद्यं खादेदन्यांश्च खादयेत् ।
पशूनां पुरुषाणाञ्च सुखशक्तिविवर्धनम् ॥२९५॥

कुर्यात्, येनेश्वरस्यास्याः सृष्टेर्योऽस्ति शुभः क्रमः ।
तदानुकूल्यतो सम्यक् स्यातां सर्वसुखोन्नती ।२९६॥ युग्मकम्

मिथ्या जगदिति बोधस्वीकरणादुन्नतौ ध्रुवं जगतः ।
विद्यावाप्तिपरस्परारागे श्रद्धासमुद्योगौ ॥२९७॥

नाशं यातः सुतरां जगतः श्रेष्ठानि पुण्यकर्माणि ।
सर्वाण्येव च तस्मान्नष्टभ्रष्टानि जायन्ते ॥२९८॥ युग्मकम्

समर्थो मानवो नैव भविष्यति सुखाप्तये ।
गुणैर्विना भवे जातु स्वेन्द्रियाणां जयादिकैः ॥२९९॥

विद्यां श्रियं समधिगत्य सुहृद् वरांश्च,
संप्राप्नुवन्ति मनुजास्तु यथा सुखानि ।
तद्वद् बुधा अपि विदन्ति निजस्वरूपम्
ये ते सुखानि निखिलानि समाप्नुवन्ति ॥३००॥

आप्तेभ्यः सत्यवादिभ्यो धर्मिभ्यो ज्ञभ्य एव च ।
द्रुह्यन्ति ये नरा दुःखं महत्ते प्राप्नुवन्त्यलम् ॥३०१॥

यावन्तं जगतः कश्चिदुपकारं करिष्यति ।
स सुखं लप्स्यते तावत् परमेशव्यवस्थया ॥३०२॥

दानम्

लोकेऽस्मिन्नुत्तमो दाता ग्रहीता मध्यमः स्मृतः ।
चौर्येण लभते यस्तु सोऽधमः समुदीरितः ॥३०३॥
सद्विद्यादिपदार्थानां दातारोऽनुपमं यशः ।
अधिगत्यात्मनोऽन्यांश्च सुखिनः कुर्वते नराः ॥३०४॥
सुपात्रदानतः कीर्तिः संसारे यादृशी भवेत् ।
उपायान्तरतो नैव तादृशी ख्यातिरुत्तमा ॥३०५॥
संसारस्योपकाराय सुपात्रेभ्यो ददाति यः ।
तदीयकुलतो नाशं वसु नैति कदाचन ॥३०६॥
विद्यां यथा नरोऽन्येभ्यो लभते तां तथैव सः ।
अन्येभ्योऽपि स्वयं दद्यान्न धर्मोस्मात् परः स्मृतः ॥३०७॥
दानं यथार्थं च तदेव बोध्यं विद्याप्रसाराय कलाविवृद्ध्यै ।
यद्दीयतेऽनाथसुदीनरोगिकुष्ठार्तिसंपीडितमानवेभ्यः ॥३०८॥
दुर्भिक्षादिविपत्काले सर्वे सन्त्यधिकारिणः ।
जलान्नवसनस्थानचिकित्सादेश्च देहिनः ॥३०९॥
संसारे दानशीलो यः स एवास्त्यखिलप्रियः ।
विरोधं मानवः कोऽपि नहि तस्य चिकीर्षति ॥३१०॥
रागद्वेषविहीनाः परगुणविहितादरास्तथा दाने ।
आत्मसमानन्यानपि कुर्वन्तो जगति धनवन्तः ॥३११॥
दानं वस्त्रफलादीनां व्याख्यानेषु कलासु च ।
आर्षरीत्यनुकूलं न नोचितं त्याज्यमस्त्यतः ॥३१२॥
दानं न केवलं तस्मै ददात्याह्लादसन्ततिम् ।
यस्मै प्रदीयते दात्रे पुरुषायापि यच्छति ॥३१३॥

दीर्घायुःसाधनम्

ब्रह्मचर्यात् सदाचारनियमानाञ्च पालनात् ।
आयुः कर्तुं नरः शक्तस्त्रिगुणं च चतुर्गुणम् ॥३१४॥

युक्ताहाराविहारस्य ब्रह्मचर्यस्य वर्जनात् ।
व्यभिचारेण भोगेषु चासक्त्यायुर्न नाशयेत् ॥३१५॥

न्यायवान् यः सहिष्णुर्वशी मानवः सेवते भेषजं वर्तते शक्तितः ।
भोजने वा विहारे, शतायुर्नरो जायते सोऽत्र सन्देहलेशोऽपि न ॥३१६॥

यः प्रभुं सत्यवाचं तथाप्तं बुधं सेवते दुष्टसंगेन हीनो नरः ।
सच्चरित्रः स प्राप्नोति दीर्घायुषं धान्ययुक्तो धनैरक्षयैः संयुतः ॥३१७॥

प्रातः शयानस्य विभातवेला शनैः शनैरायुरपाकरोति ।
अतो विबुध्योषसि कार्यजातं धर्मस्य विद्योपकृतेश्च कुर्यात् ॥३१८॥

तुरीये प्रहरे बुध्वा निशायाः शयनावधि ।
क्षपयन्ति न ये कालं व्यर्थं ते सुखिनो नराः ॥३१९॥

सूर्योदयात् समुत्थाय प्रागेव बलवान्नरः ।
विदधाति परित्यागं दारिद्रस्य सुखावहम् ॥३२०॥

पूर्णेन ब्रह्मचर्येणाधीतविद्यान् सुधार्मिकान् ।
नरान् मध्ये न गृह्णाति कदाचिन्मरणं ध्रुवम् ॥३२१॥

यावत् शरीराणि दृढानि नैव,
न चाप्तसंगो मतयश्च पूताः ।
वशित्वपूर्णश्च न यावदायु-
स्तावत् कथं श्रीरतुला च विद्या ॥३२२॥

पुण्यं पापं च

न्यायस्याचरणं ब्रह्मचर्यं सत्यस्य भाषणम् ।
धर्मोऽधर्मश्च सत्यस्य त्यागोऽन्यायस्य सेवनम् ॥३२३॥

मानवैः सकलैः सार्धं परोपकृतये सदा ।
व्यवहारोऽस्ति चारित्र्यमौदार्यप्रीतिपूर्वकम् ॥३२४॥युग्मकम्

त्यागं यथा सपत्नानां सत्वरं कुरुते नरः ।
अन्यायाचरणं पापं तथा तूर्णं परित्यजेत् ॥३२५॥

उच्छेदनेन मूलानां नश्यन्ति तरवो यथा ।
तथा दुःखानि पापानां त्यागेनात्र न संशयः ॥३२६॥

स्वभावो धनस्याऽस्त्ययं यद् विवृद्धं
धनं मानवं कर्महीनं शयालुम् ।
तथालस्ययुक्तं विधत्ते, विधेयं
नरैः पौरुषं वित्तवद्भिः सदैव ॥३२७॥
सज्जानानां सदा सम्पत् परेभ्यः सुखदायिका ।
दुष्टानां च परेभ्योऽस्ति केवलं दुःखदायिका ॥३२८॥
न्याय्येनोपार्जितं द्रव्यं सफलं तस्य विद्यते ।
न्याय्ये येन कृतस्तस्य व्यवहारे व्ययः शुभः ॥३२९॥
धर्मेण लभ्यते यस्तु स एवार्थो निगद्यते ।
यस्यावाप्तिस्त्वधर्मेण सोऽनर्थो नात्र संशयः ॥३३०॥

पतिः पत्नी च

परस्त्रीरतो यः परित्यज्य पत्नीं
सुखं क्वापि नाप्नोति ना सः प्रमादी ।
स्वपत्नीप्रियो यः परस्त्रीविरक्तः
इहामुत्र चाप्नोति सौख्यं परं स ॥३३१॥
धर्मपत्न्याः स्वकीयाया नानिष्टं चिन्तयेन्नरः ।
नानिष्टं चिन्तयेन्नारी पत्युः स्वस्य कदाचन ॥३३२॥
जायापती कुले यस्मिन् प्रीतिपूर्णौ परस्परम् ।
विषयेषु समस्तेषु कल्याणं तत्र जायते ॥३३३॥
या नार्यो ये नरा ईशं ध्यात्वा प्रीत्या परस्परम् ।
भाषन्तेऽनेकरूपाणि प्राप्नुवन्ति सुखानि ते ॥३३४॥
आन्योन्यमानं या नार्यो मानवा ये च कुर्वते ।
तत्कुले सुखमायाति दुःखं दूरं पलायते ॥३३५॥
सत्क्रियन्ते स्त्रियो यत्र तत्र विद्यायुता नराः ।
देवसंज्ञाः सदा क्रीडां सानन्दं कुर्वते गृहे ॥३३६॥
तिरस्कृतास्तु ता यत्र गृहे तत्र समाः क्रियाः ।
निष्फला एव जायन्ते नानन्दं कोऽपि विदन्ते ॥३३७॥युग्मकम्

धर्मपत्नी शुभाचारविधानविहितादरा ।
सौभाग्यसम्पदां वृद्धिं कुरुते नात्र संशयः ॥३३८॥
नरस्यैकस्य नार्येका स्त्रियश्चैक पतिर्भवेत् ।
वेदरीत्या विवाहश्च द्विजानां न पुनर्भवेत् ॥३३९॥
पतिं यथोत्तमा पत्नी करोत्यानन्दनिर्भरम् ।
ब्राह्मवेला जगत् सर्वं तद्वदत्र न संशयः ॥३४०॥
न्यायं कुर्वन्तु नारीणां न नरास्ता यतो भिया ।
लज्जया तत्पुरो वक्तुं पठितुं सन्ति न क्षमाः ॥३४१॥

अधार्मिकाः

संप्राप्तिं सत्यविद्याया ज्ञानं धर्मस्य जात्वपि ।
कर्तुं नैव क्षमाः सन्ति नराः कामातुरा भुवि ॥३४२॥
अधार्मिका नरास्तेऽत्र ये सन्त्यनृतवादिनः ।
धार्मिकाः सन्ति ते सन्तः सन्ति ये सत्यवादिनः ॥३४३॥
हानिर्मिथ्याप्रतिज्ञस्य यादृशी तादृशी भुवि ।
कस्यापि न परस्यातः पूरयेत् संगरं सदा ॥३४४॥

निर्भयः

परोपकारे निरता जना ये
भवन्ति धर्मैकधना जगत्याम् ।
भवन्ति ते नैव भयाभिभूता
कदापि कुत्रापि कथञ्चिदस्याम् ॥३४५॥
जन्मिना नैव केनापि कार्यं मृत्युभयं यतः ।
निश्चिते मरणे मौर्ख्यं मरणाद् भयमुच्यते ॥३४६॥
कारावासोऽस्ति सत्याय न लज्जाजनकः क्वचित् ।
धर्ममार्गसमारूढः संजातो निर्भयोऽस्म्यहम् ॥३४७॥

विद्या वेदाधिकारी

विद्यां प्राप्तुं तु संसारे सन्ति सर्वेऽधिकारिणः ।
विद्यायां मानवो विज्ञैर्न ज्ञेयोऽनधिकारिणो ॥३४८॥

स्त्रीशूद्रावपि किं वेदं पठेतां ? सकला नराः ।
स्वपितुः पावनीं वाणीमध्येतुमधिकारिणः ॥३४९॥
धर्मविद्याप्रचाराय ब्राह्मणा ज्ञानसंयुताः ।
प्रभवः केवलं सम्यक् ते तत्कार्याधिकारिणः ॥३५०॥
यदि पापविपाकास्ति विद्या सा पुरुषैरपि ।
अवश्यं संपरित्याज्या स्त्रीभिरेव न केवलम् ॥३५१॥
मूढा अशिक्षिता एव पापं कुर्वन्ति मानवाः ।
स्त्रीषु विद्याप्रचारोऽतः करणीयो जनः समैः ॥३५२॥
निषेधं यदि शूद्रेभ्यो ब्राह्मणेभ्यो विधिं यदि ।
वेदानामीश्वरः कुर्यात् पक्षपाती भवेन्न किम् ॥३५३॥
पाठनं पठनं वेदवाण्या इष्टं भवेन्न चेत् ।
शूद्रेभ्यस्तर्हि तत्काये वाक्श्रुत्योर्निर्मितिः कथम् ॥३५४॥
अग्निवाय्वादयः सर्वे पदार्था निर्मिता यथा ।
सर्वेभ्यः परमेशेन वेदा अपि तथा न किम् ॥३५५॥

तीर्थम्

प्राणादावतिनिष्ठया वितनुते जीवो गयासंज्ञके
ईशोपासनमाशु मुक्तिपदवीमाप्नोति तेनैव सः ।
प्राणेष्वेव बलं च सत्यमुभयं सम्यक् स्थितं विद्यते
प्राणानामपि प्राणताऽस्ति सुतरां यस्मात् परब्रह्मणि ॥३५६॥
तस्यास्ति प्रतिपादकोऽतिमुखरो मन्त्रो गुरुर्गौरवात्,
तन्नामाऽस्ति गयेति तस्य जपनं सार्थं तथा श्रद्धया ।
दुःखैर्भक्तिसमन्वितं बहुविधैरीशस्य जीवं पृथक्
कृत्वा मुक्तिसुखं ददाति महितं काम्यं समस्तैर्बुधैः ॥३५७॥
प्राणानाञ्च निघण्टुसूचिलिखिता संज्ञा गया विद्यते,
प्राणायामविधानतो नियमितान् कृत्वा च तान् पूर्णतः ।
भक्त्येशस्य भवन्ति दुःखरहिता विज्ञानवन्तो नराः
गायत्र्यस्ति गया सदा भवति सा मुक्तिप्रदा सौख्यदा ॥३५८॥

सुखस्योन्नतिः सज्जानां च रक्षा प्रजापालनं दुष्टसंदण्डनं च ।
ऋतस्योद्गतिः सर्वविद्याप्रचारो गयाश्राद्धमेतत्पृथक्संगतं च ।।३४९।।
वेदादिशास्त्राध्ययन तथा च तत्पाठनं सत्यमुदीरणञ्च ।
सेवा गुरोरीश्वरसन्निधानं सुसंगतिः ब्रह्मविचारणा च ।।३५०।।
तीर्थान्यपारस्य नयन्ति पारं दुःखोदधेः सर्वनरानिमानि ।
अन्यानि तीर्थानि नयन्ति यानि पारं समुद्रादिजलाशयानाम् ।।३६१।।
कस्मिंश्चिदपि तीर्थे न पापं नश्यति मज्जनात् ।
योगेन तपसा शुद्धसंकल्पेनैव नश्यति ।।३६२।।

तपस्त्यागौ

सत्यांगीकरणं यथार्थकलनं सत्यस्य संभाषणम्
वेदादिश्रवणं मनोनियमनं पापाच्च श्रुत्यादिकम् ।
रुध्वा श्रेयसि योजनं बुधजनैः संगं च क्रोधादिक-
त्यागं चाशु विधाय शान्तभवनं विद्यादिपूज्यान् गुणान् ।।३६३।।
पात्रेषु प्रणिधाय यज्ञकरणं भूम्यन्तरिक्षस्थितान्,
ज्ञात्वा सर्वपदार्थकान् निजधिया शक्त्या च योगे मतिम् ।
कृत्वा यत् समुपासनं भवपितुर्नित्यं परब्रह्मणः
प्राणायामविधानमेतदखिलं पूतं तपः कथ्यते ।।३६४।।कुलकम्
स्व सुखानां परित्यागो जीवनस्यापि कथ्यते ।
त्यागः सर्वोत्तमः सत्यपरोपकृतये तथा ।।३६५।।

अतिथिः

सत्योपदेशैः परमोपकारं नृणां समेषां विदधत्यलं ये ।
धनान्नदानैः प्रियवाक्प्रदानैस्ते सत्क्रियार्हाः पुरुषा भवन्ति ।।३६६।।

आचार्यः

अत्याचाराननर्थांश्च त्याजयित्वा विवेकतः ।
ग्राहयेद् यः सदाचारमाचार्यः स निगद्यते ।।३६७।।
यः शिक्षां व्यवहारस्य शिष्येभ्यो धर्मसम्मताम् ।
स्नेहेन महता दत्ते स आचार्यो निगद्यते ।।३६८।।

आप्तः

नम्यं नमन्ति प्राप्तव्यं प्राप्नुवन्ति वदन्ति च ।
वाच्यं निघ्नन्ति हन्तव्यं ज्ञेयमाप्ता विजानते ॥३६९॥
यथात्मने तथान्यस्मै सुखेच्छां विदधाति यः ।
स एव सत्क्रियायोग्य आप्तोऽस्ति खलु मानवः ॥३७०॥
अमानिनो धर्मपरा बुधा ये सत्योपदेशं नरसौख्यहेतोः ।
कुर्वन्ति ते योगयुता भवन्ति विपक्षपाताः पुरुषाः सदाप्ताः ॥३७१॥
असत्यखण्डनं सत्यमण्डनं निखिलैरपि ।
आप्तैः जनैः सदा कार्यं जगत्कल्याणसिद्धये ॥३७२॥

सूक्ष्मबुद्धिः

सूक्ष्मैब जायते बुद्धिः सूक्ष्मार्थग्रहणे क्षमा ।
पिपीलिकैव गृह्णाति धूलिमिश्रितशर्कराम् ॥३७३॥

भूतम्

समयस्य गतस्यास्ति भूतमित्यभिधानकम् ।
नेदं योनिविशेषोऽस्ति रुग्दशोन्मत्ततात्वियम् ॥३७४॥

मूर्खखलौ

ईश्वरान् मन्यतेऽनेकानवतारांश्च तस्य यः ।
तस्मान्मूढतमो नान्यो मानवः संभविष्यति ॥३७५॥
विद्याहीनो बुधैः सार्धं कुतर्कं कुरुते तु यः ।
न स किञ्चिदवाप्नोति जगत्यां जातु मानवः ॥३७६॥
निन्दन्तु विदुषो ये तान् मूर्खान् मूर्खांश्च ये बुधान् ।
विजानन्तु तिरस्कार्या दुर्जनास्ते समैः जनैः ॥३७७॥

मित्रम्

प्रियं मित्रं स्वकं मित्रं दुःखबन्धनतः पृथक् ।
विधाय तस्मै सौख्यं च प्रयच्छति समुत्तमम् ॥३७८॥

मुक्तिः

स्त्रियो नराश्च विद्वांसो धार्मिका गृहवासिनः ।
मुक्तिमुक्ताफलप्राप्तिमनायासेन कुर्वते ॥३७९॥

मुक्तिरस्तीश्वरप्राप्तिर्जीवानां च प्रभुं प्रति ।
आकर्षणं तदानन्दलीनता मुक्तिलक्षणम् ॥३८०॥

मुमुक्षवो ये मनुजा भवेयुर्धर्मेण संगैर्विदुषां च शीघ्रम् ।
अधर्मरोधात् सततं निजात्मा सदा विशुद्धः विबुधैर्विधेयः ॥३८१॥

कुर्वन्ति ये प्रभौ प्रीतिं तदाज्ञाभंगतो भयम् ।
धर्मस्याचरणं चात्र मुक्तिमासादयन्ति ते ॥३८२॥

वृत्तीरखिलदोषेभ्यो निवार्य मनसः स्थिराः ।
कृत्वा शुभगुणेष्वस्ति योगो मुक्तेरधिग्रहः ॥३८३॥

न बन्धनाय, मोक्षाय जनानामहमागतः ।
दौर्जन्यं न त्यजेद्दुष्टः सौजन्यं सुजनः कथम् ॥३८४॥

वेदानुकूलैश्चरितैरेव लोकेऽस्ति नान्यथा ।
प्राप्तिर्मोक्षस्य पापानां विनाशस्य च संभवः ॥३८५॥

लोभः

अज्ञानभूभृतः शृङ्गादुत्तुङ्गात् प्रभवत्ययम् ।
महालोभनदः पुण्यभूरुहाणां विनाशकः ॥३८६॥

आलस्यम्

आनन्दामृतपानस्य यस्य स्याल्लालसा हृदि ।
स्वप्नेऽपि नैव यायात् स आलस्यगरलान्तिकम् ॥३८७॥

पुरुष हे ! पुरुषार्थपरो भव भवपतेर्वचनं न शृणोति यः ।
विरहितः स सुखेन महाजडो भवति भाग्यपरोऽलसशेखरः ॥३८८॥

भारतम्

न चान्यो देशोऽस्ति क्वचिदपि धरामण्डलतले
यथार्यावर्तोऽयं गुणिगणनिवासो निरुपमः ।
धरास्य स्वर्णाभा जगति कथिता हेमजननी,
समार्याः सृष्ट्यादौ कृतवसतयोऽस्मादिह पदे ॥३८९॥

आर्यजातिप्रभावेण सकलास्वन्यजातिषु ।
सभ्यतायाः प्रचारोऽस्ति सदाचारस्य चावनौ ॥३९०॥
असीमिता श्रियो वृद्धिरन्तेऽवनतिकारणम् ।
पतनस्यार्यजातेश्च कारणत्वेन मे मता ॥३९१॥
आर्तनादैरनाथानां विधवानां च रोदनैः ।
सर्वनाशोऽस्य देशस्य जायते गोवधेन च ॥३९२॥
लक्ष्यैकतां विना धर्मभाषयोश्चैकतां विना ।
भारतस्य हितं पूर्णं दुष्करं कर्म विद्यते ॥३९३॥
जातीयश्च समुत्कर्षस्तावन्नैव भविष्यति ।
सर्वोन्नतिनिदानं न यावदैक्यं भविष्यति ॥३९४॥
भाषाया भावनायाश्च यत्रैक्यं संविजायते ।
सुखान्यायान्ति तद्देशे सरितः सागरे यथा ॥३९५॥
देशस्य सर्वे राजानः सुधारं निजशासने ।
कृत्वा सम्पादयेयुश्च तदैक्यमिति कामये ॥३९६॥
यद्येवमाचरिष्यन्ति नृपा देशहितेच्छया ।
भविष्यति न संदेहः सुधारः सर्वतोमुखः ॥३९७॥
लक्ष्यं मे धार्मिकं सार्वजनीनं विस्तृतं महत् ।
अल्पीयानपि संकोचस्तस्य सम्भाव्यते नहि ॥३९८॥
निमग्ना गाढनिद्रायामीदृश्यां देशवासिनः ।
नाक्षीण्युन्मीलयिष्यन्ति तेषां शब्दाः सुखावहाः ॥३९९॥
सुधारस्य च नामापि नैते निद्रावशं गताः ।
गृह्णन्ति न विदन्तीमं विनाशं समुपस्थितम् ॥४००॥
कुरीतीनां कुनीतीनां खण्डनस्य कठोरया ।
कशया चेत् प्रबुद्धाः स्युः कृपा स्यात् परमात्मनः ॥४०१॥
भूमण्डले जनैः शून्यो देशः कोऽपि न जायते ।
गुरूणां नायकानाञ्च परालस्यप्रमादतः ॥४०२॥

धर्मस्य च समाजस्य चिह्नान्यैकस्य पूर्णतः ।
भावभाषाविचाराणां वैपरीत्यमुपासते ॥४०३॥
आचाराश्च विचाराश्च जायन्ते परिवर्तिताः ।
वेषभाषादयो भिन्नाः पूर्णतश्च भवन्त्यलम् ॥४०४॥
ईदृशः समयश्चैतद्देशोपरि समागतः ।
यदि संरक्षिता नेयमार्यजातिः प्रयत्नतः ॥४०५॥
परिवर्तनचक्रं च चंचलं संभ्रमादियम् ।
ततोऽधिरुह्य पूतं स्वं शरीरं नाशयिष्यति ॥४०६॥
पूर्वं प्रमादहेतोश्च कोटिशो यवनाः जनाः ।
अभूवन् साम्प्रतं चैते भवन्तीसावलम्बिनः ॥४०७॥
ईदृशे समये घोरे बोद्धव्या धर्मबान्धवाः ।
शिखां संगृह्य परुषैर्निद्रामग्ना दृढैः करैः ॥४०८॥
अहं स्वकटुकर्तव्यं जातिरक्षणकाम्यया ।
पालयामि न मे स्वार्थो मम कर्मणि विद्यते ॥४०९॥
कर्तव्यपालनान्निन्दां तिरस्कारं तथाविधम् ।
इष्टिकोपलवर्षां च समाप्नोमि पदे पदे ॥४१०॥
परन्तु बन्धुवात्सल्यभावना मां विपत्स्वपि ।
प्रोत्साहयति कर्तव्यपालनाय क्षणे क्षणे ॥४११॥

विद्याविद्ये

विद्यानिधितो न परः सुखकारी विद्यते निधिः कोपि ।
अवधयेमिदं सत्यं युष्माभिर्मानवाः ! सततम् ॥४१२॥
विद्यैव लोचनसमा पुरुषस्य, लोके
शिक्षां विना भवति नैव कदापि बोधः ।
ते ज्ञानिनो जगति ये निजबाल्यकाले
संप्राप्नुवन्ति मनुजाः खलु पूर्णविद्याम् ॥४१३॥

विद्यैव यच्छति सुखं पुरुषाय तस्मात्
विद्या न येन मनुजेन कदापि लब्धा।
दारिद्र्यघोरतमसान्तरतः परीतः
रिक्तः सदा भवति पूर्णधनोऽपि लोके ॥४१४॥

क्वास्ति बोधं विना सत्यविद्यामहः
क्वोन्नतिश्चास्ति बोधस्य लब्धिं विना।
दुःखवारांनिधावेव मग्नाः सदा
मानवाश्चासते किं विना नोन्नतिम् ॥४१५॥

ब्रह्माण्डशोभनसमस्तपदार्थजात-
प्राप्त्या सुखं समधिगच्छति यावदत्र।
विद्योपलब्धिसुखराशिसहस्रभाग
तुल्यं न तद् भवितुमर्हति निश्चयेन ॥४१६॥

विद्याभास्करभासाऽतुलया सुतरां प्रकाशितात् हृदयात्।
चोरयितुं सुखरत्नं न दुःखचौरः प्रभुर्भवति ॥४१७॥

कतिपयदिवसस्थायी दम्भः सर्वस्य निश्चयेन परम्।
विद्यादम्भो नश्यति, क्षणमात्रेणैव मूर्खाणाम् ॥४१८॥

त्यक्त्वाग्रहं यदि विपश्यति मानवोऽत्र
विद्यादृशा भवति तर्हि यथार्थबोधः।
विद्या भवेद् यदि न तर्हि कथं भवेत्तत्
ज्ञानं विवेकविमलं सुखशान्तिदायि ॥४१९॥

ये भवन्ति नरा विद्यासम्पन्नाः पूर्णरूपतः।
सत्यासत्यं त एवेह विदन्ति ज्ञानिनो जनाः ॥४२०॥

तमस्तोममविद्याया उदयन् सत्यभास्करः।
सूचीभेद्यं क्षणेनैव विनाशयति लीलया ॥४२१॥

धर्मकर्मेश्वराद् भिन्ननिरानन्देषु वस्तुषु।
आनन्दावगमः प्रोक्तोऽविद्याया एव लक्षणम् ॥४२२॥

विद्याविद्योद्भवं लोके द्विविधं सुखमुच्यते ।
सत्यं विद्योद्भवं तत्र ज्ञाननाश्यं तथापरम् ॥४२३॥
यदविद्योद्भवं तन्न सुखं सत्यमिहोच्यते ।
सुखं तत् प्राप्नुवन्त्येव पशवो निजयोनिषु ॥४२४॥

यज्ञः

अनुष्ठानेन यज्ञस्य वायोर्वृष्टिजलस्य च ।
यादृश्यौ शुद्धिपुष्टी च तादृश्यौ नान्यकर्मणा ॥४२५॥
अनुष्ठानेन यज्ञस्य सुखदानं सदा परः ।
धर्मोऽस्त्यखिलभूतेभ्यो मानवानां सचेतसाम् ॥४२६॥
यज्ञ एवंविधः संविधेयो नरै-
र्येनपूर्णश्रियोऽन्नादिकस्यापि च ।
रोगनाशस्य, पूर्णायुषो विस्तरः
सौख्याराशेश्च सम्यग् भवेत् सर्वतः ॥४२७॥
प्रजापालनमेवास्ति विद्यादानञ्च पूर्णतः ।
यज्ञस्य करणं राज्ञां पुरुषाणां शुभावहम् ॥४२८॥
अग्निहोत्रादिकान् यज्ञान् पुरुषा ये दिने दिने ।
कुर्वन्ति ते विनायासं वर्धयन्ति जगत्सुखम् ॥४२९॥
मनुष्याः ! सर्वयज्ञेषु वित्त, वह्न्यादिकं पशुम् ।
होतव्या मारणीयाश्च नैतेषु पशवः क्वचित् ॥४३०॥
पशून् हत्वा विधातव्यस्तन्मांसरुधिरैरिदम् ।
यज्ञो न लिखितं क्वापि वेदादिष्वागमेषु च ॥४३१॥
यज्ञमांसाशने दोषो नैषोक्तिर्वाममार्गिणाम् ।
प्रष्टव्यास्ते न हन्तव्याः सकुटुम्बं कथं समे ॥४३२॥
पुण्यातिशयसम्पन्ना यज्ञकर्मविधायकाः ।
भवन्ति सत्कृता लोकेऽधिगत्य परमेश्वरम् ॥४३३॥
शुद्धैः पदार्थैः विधिना जुहुयात् स्युर्येन सर्वशः ।
प्राप्याग्निसूर्यमेघास्ते सूक्ष्मा वर्षोपकारकाः ॥४३४॥

विनयार्जवसम्पन्नाः साधयन्ति प्रयत्नतः ।
सर्वोपकारयज्ञं ये राज्यं तेऽश्नुवते महत् ॥४३५॥
सुवृष्टिर्जायते शुद्धे समीरे यज्ञकारणात् ।
शरीरं रोगहीनं च बुद्धिश्च विशदा तथा ॥४३६॥
ज्ञानस्य जायतेऽवाप्तिः स्वर्गस्य च सुखस्य च ।
अतः सर्वैः सुखावाप्त्यै विधेयेष्टिः सदा शुभा ॥४३७॥
सूपराशिं यथा हिंगु करोत्यल्पं सुवासितम् ।
अग्निहोत्रं तथा वायुं सन्देहावसरोऽत्र कः ॥४३८॥
न्यायेन राज्यपरिपालनमश्वमेधः
प्रोक्तः सदा शुभकरो भुवि भूपतीनाम् ।
संछिद्य वाज्यवयवानि विभावसौ तत्
प्रक्षेपणं च हवनस्य न सोऽस्ति जातु ॥४३९॥

आचारानाचारौ

अन्यायमिथ्याकथनादिदोषान् रागं तथा द्वेषमुदस्य प्रीतेः ।
परोपकारस्य च धारणं यत् तदुत्तमाचारविधिः प्रशस्यः ॥४४०॥
सद्विद्याग्रहणरुचिः सतां च संगः
सौशील्यं विहितविधानसंविधानम् ।
आचारः शुभफलदो मतो विरुद्धो
ऽनाचारोऽशुभफलदो मतो मतौ मे ॥४४१॥
असम्मानप्रदं लज्जाजनकं च महद् भुवि ।
सीताराघवयोः रूपधारिणां वर्त्मनर्तनम् ॥४४२॥
गृहांगणगतः पूतः पवनं पावयत्यलम् ।
क्षुपस्तुलस्या लघुको दलानां भक्षणान्मुखम् ॥४४३॥
वेदानुकूलैराचारैर्व्यवहारैः समे जनाः ।
शुद्धा भवितुमर्हन्ति तदभ्यासपरायणाः ॥४४४॥
उपवीतमधृत्वा न मानवो वैदिकीं क्रियाम् ।
कर्तुमर्हति लक्ष्मैतदार्याणां धार्मिकं परम् ॥४४५॥

खण्डनं मण्डनं मेऽस्ति जनैः साकं न विग्रहः ।
ऋणादृषेरुपायत्वमानृण्यस्यैति मामकम् ॥४४६॥
ऋषीणां सन्ततिं स्वार्थरता एते प्रकुर्वते ।
कुरीतिकण्टकाच्छन्नां दुःखदग्धां कुमार्गगाम् ॥४४७॥
विलोकितुं समर्थोऽस्मि नार्यसन्तानदुर्दशाम् ।
अतः प्राणपणेनाहं कर्तुं सन्मार्गगामिनीम् ॥४४८॥
तामार्यसन्ततिं शुद्धां पूतां वैदिककर्मभिः ।
कुरीतिरहितां भूतिसहितां कृतसंगरः ॥४४९॥
गोधूमानामियं नेयं नापितस्यास्ति रोटिका ।
भक्षयिष्याम्यतोऽवश्यं भक्षणीयामिमामहम् ॥४५०॥
पूज्यानां पूर्वजानां ते रूपमाधाय नर्तकाः ।
नीचा नृत्यन्ति पुरतः कथं वीक्ष्य न लज्जसे ॥४५१॥
धर्मस्य हननं यस्तु कुरुते पुरुषाधमः ।
निमन्त्रणं ददात्यन्ते स्वनाशाय स्वयं तु स. ॥४५२॥
प्रवृत्तिं शास्त्रसंप्रोक्तां प्रज्ञास्नेहेन प्रेरिताः ।
भक्त्याचरन्तु सकलाः कर्मण्या मानवा भुवि ॥४५३॥
क्लेशयित्वा परं लब्धं मिश्रं मलिनवस्तुना ।
अश्रमोपार्जितं चान्नं त्रिविधं दूषितं मतम् ॥४५४॥
अस्पृश्यस्पृश्ययोर्व्यर्थो विचारो भोजने मतः ।
धर्मशास्त्रेषु नैतस्य वर्णनं क्वापि दृश्यते ॥४५५॥
पारस्परिकसेवास्ति धर्मो नृणामनुत्तमः ।
ज्येष्ठसेवा कनिष्ठेषु सेवाभावप्रबोधिका ॥४५६॥
परमज्ञानिनोऽस्माकमृषयश्च महर्षयः ।
क्षत्रियेभ्यो मृगादीनां वधायाज्ञामतो ददुः ॥४५७॥
नाशयेयुर्न सस्यानि नवान्युपवनानि च ।
अस्माद् वधो मृगादीनां राज्ञां धर्मः प्रकीर्तितः ॥४५८॥
रक्षणाय शरीरस्य धर्मस्तस्य प्रसाधनम् ।
नरो बलिष्ठकायेन दुष्टः पापं यथाधिकम् ॥४५९॥

कुरुते सज्जनस्तद्वत् परोपकृतिमुत्तमाम् ।
साधनस्यास्य देहस्य युक्तस्तस्मात् प्रसाधनम् ॥४६०॥
असंग्रहः परो धर्मो यतीनां नियतात्मनाम् ।
द्रव्यादाने न दोषोऽस्ति परोपकृतये परम् ॥४६१॥
कूपान्निस्सारिता कूपे यथा मृत् सम्प्रयुज्यते ।
जनादत्तं तथा द्रव्यं तद्धिताय प्रयोजयेत् ॥४६२॥
यस्मान्महत् किमपि नास्ति भवे स एव,
सर्वाधिपो भवति नः पुरतः परेशः ।
उत्थानमस्त्यनुचितं भजनस्य काले,
तस्मान्महात्मनि जने समुपागतेऽपि ॥४६३॥
परापकारसंत्यागात् पापकर्मविवर्जनात् ।
निर्धनोऽपि नरः शक्तो निजमंगलसाधने ॥४६४॥
ईशाज्ञोल्लंघनादन्या हानिः का स्यान्महत्तरा ।
वेदशास्त्रविरुद्धत्वात् संत्याज्यं मांसभक्षणम् ॥४६५॥
मततीक्ष्णसुरामत्तजनेषु भिषजो वयम् ।
यदि कोपं करिष्यामो वैद्यत्वं तर्हि नोऽफलम् ॥४६६॥
शरीरात्मगतत्वेन द्विविधाज्ञा प्रभोर्मता ।
तयोरुल्लङ्घनाद्धानिर्द्विविधैवोपजायते ॥४६७॥
आत्मादेशविरुद्धं हि यतोऽस्ति पिशिताशनम् ।
मांसभक्षा न जायन्तेऽतो नराः सिद्धयोगिनः ॥४६८॥
स्वीकुर्वन्तु समे यानि धर्मकर्माणि मानवाः ।
तान्येव धर्मरूपाणि स्वीकार्याण्यखिलैर्जनैः ॥४६९॥

राजा प्रजा च

यथोक्त शासनं कर्तुं नैकाकी पुरुषः क्षमः ।
सत्कृत्यान्यान्नरान् श्रेष्ठान् तस्मात्तस्मिन्नियोजयेत् ॥४७०॥
आहृत्य रणसामग्रीं हत्वारीन् सुखिनीं प्रजाम् ।
राजाऽधर्मात्मनः कुर्यात् सभयान् निर्भयान् सतः ॥४७१॥

प्रेम्णा यथा निजशरीरसुहृच्छरीर-
रक्षां करोति मनुजो मनुजेश्वरोऽपि ।
कुर्यात् तथैव जगतः परिपालनस्य
स्नेहेन पूततमदुष्करकर्मचक्रम् ॥४७२॥

पूर्णविद्यायुतः सत्यवादी, पटुः
सर्वशस्त्रास्त्रसंचालने, निर्भयः ।
शक्तिसम्पन्नवीराग्रगण्यो वरो
रक्षको ना नियुक्तो भवेच्छासने ॥४७३॥

छद्मना वञ्चका रात्रौ दिने वानर्थकारिणः ।
दुष्टा दण्ड्याः सदा राज्ञा पालनीयाश्च धार्मिकाः ॥४७४॥

धार्मिकः स्यात् स्वयं राजा प्रजां कुर्याच्च धार्मिकीम् ।
न्यायासनसमासीनो न्यायशीलो सदा भवेत् ॥४७५॥

नृपादयः समे सभ्या धार्मिका विनयान्विताः ।
शीतलान् सुहृदः दग्धानरीन् कुर्युर्जलाग्निवत् ॥४७६॥

यः शुभान्येव कर्माणि कुरुतेऽवयवैः समैः ।
सत्कार्यो धार्मिको राजा प्रजया स प्रतिष्ठितः ॥४७७॥

न्यायेन रक्षति जनान् यदि न प्रजेशः
कुर्यान्न चैव विधिना ग्रहणं करस्य ।
राजा विनश्यति समं प्रजया च तस्यां
वृद्धिं प्रयाति च तया सह रक्षितायाम् ॥४७८॥

जलदो जलदानेन तर्पयत्यखिलान् यथा ।
तथाभयप्रदानेन कुर्यान्नॄन् सुखिनो नृपः ॥४७९॥

अन्धानाथादिकान् राजा यः पालयति सन्ततम् ।
तस्य राज्ये सुखं नाशं न प्रयाति कदाचन ॥४८०॥

यः प्रकुप्यति दुष्टेभ्यः शान्तः श्रेष्ठनरेषु य ।
स्वराज्यवृद्धिं राजासावनल्पां कर्तुमर्हति ॥४८१॥

नाशं कृत्वाऽसतां राजा पालयेद्यो निजां प्रजाम् ।
न्यायेन सः प्रयात्याशु प्रजास्नेहस्य पात्रताम् ॥४८२॥

दुष्टाः श्रेष्ठाः कदर्यश्चि शूरा यत्संगमात् नराः ।
कृपणा दानिनो योग्यः स राजा भवितुं नरः ॥४८३॥

निःसार्य सलिलं कूपात् यथा क्षेत्रादितर्पणम् ।
प्रजा नरपतिं तद्वत् प्रजां भूपश्च तर्पयेत् ॥४८४॥

भवेयुर्न भूपा जनाश्चापि तेषां
दुराचारिणो, धार्मिकाः न्यायशीलाः ।
सदा सन्तु दृष्टान्तरूपाः प्रजानां
प्रजा भूपछायेव यस्मात् सदैव ॥४८५॥

स्वभावैर्गुणैः कर्मभिर्लोककर्तु
र्नरो योऽनुकूलानि नैजानि कुर्यात् ।
स एवैकछत्रं प्रभुत्वं पृथिव्याः
समाप्नोति नान्यो ध्रुवं ज्ञेयमेतत् ॥४८६॥

अधार्मिकं जनं मूर्खं नियुक्तं राज्यकर्मणि ।
विदधीत न विस्मृत्य भद्रकामः प्रजाजनः ॥४८७॥

न स्वतन्त्रो नरः कश्चित् कुर्यात् राज्यमसंयतः ।
शिष्टानां पुरुषाणां स सभया संयतो भवेत् ॥४८८॥

तावत् सम्वर्धते राज्यं यावद् धर्मयुता नराः ।
तदा नश्यति जायन्ते यदा तेऽधर्मसंयुताः ॥४८९॥

स्रष्टुः सृष्टौ राज्यं न स्थिरतामेति चिरकालम् ।
अन्यायिनोऽभिमानं दधतो मौर्ख्यं च धारयतः ॥४९०॥

विद्यया शिक्षया श्रेष्ठया शिक्षिताः
पार्थिवाः श्रीयुताः पाठकान् सेवया ।
सत्पदार्थैर्धनैः प्रीणयेयुर्बुधान् शिक्षिका-
श्चान्नवस्त्रादिभिः सर्वदा ॥४९१॥

दद्यात् पीडां प्रजाभ्यो यो राजा राजा न स स्मृतः ।
न च विद्वान् स विद्वान् यः कुर्यान्नान्यं नरं वरम् ॥४९२॥

सभायां विदुषां गत्वा श्रोतव्यः सन्ततं नृपैः ।
उपदेशः प्रजाभिश्च कार्याकार्यप्रबोधकः ॥४९३॥

रक्षां प्रजायाः कर्तुं न क्षमः कोऽप्यस्ति मानवः ।
ईश्वरस्याश्रयं यावन्न गृह्णाति जगत्पतेः ॥४९४॥

प्रजाभ्यः करमादाय राजा तद्रक्षको भवेत् ।
करं वा नैव गृह्णीयात् ता न दद्युर्विपर्यये ॥४९५॥

जनेभ्यो बलिमादाय यो राजा तान् न पालयेत् ।
स लुण्ठकसमानोऽस्ति राजा राजा न विद्यते ॥४९६॥

भूपादयो नरवराः ! असुहृत्सुहृद्भ्यो
ग्राह्या गुणाः समुचितात्र न भेदबुद्धिः ।
संमोदयन्ति सुगुणा असुहृद्गृहीता
दोषाः सुहृद्परिगता अपि पीडयन्ति ॥४९७॥

राज्ञा विषयभोगेषु रतौ नारीनरावुभौ ।
दण्डयौ तीक्ष्णेन दण्डेन व्यभिचारविवर्धकौ ॥४९८॥

कुशिक्षया मनुष्यान् ये दूषयन्ति तथा च तान् ।
निन्दायां विषयासक्तौ प्रवृत्तान् च प्रकुर्वते ॥४९९॥

हे नृपाः ! मानवाः ! सम्यक् युष्माभिस्तेऽखिला नराः ।
दण्डनीयाः प्रयत्नेन सन्ततं साधुनिन्दकाः ॥५००॥

प्रजाभ्यः पितृवद् राजा राज्ञे पुत्रनिभाः प्रजाः ।
कुमार्गाद् वारणं सूनोः सन्मार्गे स्थापनं वरम् ॥५०१॥

निष्पक्षं न्यायकरणं कर्मैकं मुक्तिदायकम् ।
भावत्कान्यन्यकर्माणि सन्ति मोक्षप्रदानि न ॥५०२॥

प्रमादालस्यरहिताः प्रजापालनतत्पराः ।
निर्वाणपदमाप्स्यन्ति भवन्तो नात्र संशयः ॥५०३॥

मानवः

बलेन यो रक्षति शक्तिहीनान्
भूत्वा वली सोऽस्ति नरः पृथिव्याम् ।
स्वार्थे रतो यः परहानिकारी
सोऽस्त्यग्रजो मूढतमः पशूनाम् ॥५०४॥

विधाय हानिं क्षणभंगुरेऽस्मिन् स्वजीवने यो मनुजः परेषाम् ।
स्वकीयलाभं विदधाति नैतन् मनुष्यताया वहिरस्ति किं भोः ॥५०५॥

यादृशी दक्षिणा प्राप्यते पूजकैः तादृशो मन्दिरेषु प्रसादोद्गमः ।
हेतुनानेन सन्त्यापणान्येव किं श्रेष्ठिनां नैव तान्यत्र सर्वाण्यहो ॥५०६॥

स्वहिताय विचेष्टन्ते गर्दभाः पशवोऽप्यलम् ।
उपकारी रतोऽन्येषां हिते यः स नरः स्मृतः ॥५०७॥

पशवः शक्तिसम्पन्ना यथा निर्बलघातका ।
नरास्तथैव चेत् कुर्युर्न नरा पशवो हि ते ॥५०८॥

निर्बलान् यो वली भूत्वा रक्षेन्नित्यमतन्द्रितः ।
स एव मानवो लोके प्रकृत्या मानवः स्मृतः ॥५०९॥

मातापितरौ

मानवः कोऽपि कुर्यान्नो जातु मातुर्निरादरम् ।
तथा कृते समृद्धिं सोऽवाप्नुयान्महतीं स्थिराम् ॥५१०॥

विना न शिक्षया जातु विद्वज्जनकयोर्गुरोः ।
मानवानां समभ्येति साफल्यं जन्म भूतले ॥५११॥

पितरौ कुरुतो यद्वत् पालनं निजसन्ततेः ।
पित्रोः सेवा विधातव्या सन्तत्यापि तथा सदा ॥५१२॥

दत्तो न पितरौ यावत् विद्यायाः परमं धनम् ।
सन्ततिभ्यो न तौ तावत् कृतकृत्यौ भविष्यतः ॥५१३॥

सन्ततिर्भाग्यसम्पन्ना सा धन्यं चास्ति तत्कुलम् ।
धार्मिकौ पितरौ यस्या विद्यया समलंकृतौ ॥५१४॥

माता स्वसन्ततिं सम्यगुपदेष्टुं यथा क्षमा ।
उपकर्तुं च संसारे तथान्यो नैव विद्यते ॥५१५॥

मद्यपानम्

मद्यपाने तथा मांससंभक्षणे
नास्ति दोषो परस्त्रीविहारे तथा ।
शैशवालाप एवास्ति न प्राप्यते
प्राणिपीडां विना जातु मांसाशनम् ॥५१६॥

मद्यपानात् स्वबुद्धेर्विनाशः सदा
जायते प्राणहानिस्तथा जायते ।
मानवानां परस्त्रीविहारेण हा
पुण्यहानिः विनाशः परश्चायुषः ॥५१७॥

मादकानां पदार्थानां त्यक्त्वा संसेवनं नराः ।
सेवेरन् बलबुद्ध्यायुर्वीर्यसौख्यविवर्धकान् ॥५१८॥

आत्मप्रशंसा

श्लाघां स्वकीयां स्वमुखेन कोऽपि
भद्रो जनो नैव कदापि कुर्यात् ।
परैः कृतां तां न भवेन्निशम्य
मग्नः प्रमोदाम्बुनिधावगाधे ॥५१९॥

अहंकारजयी, नाहंकार्यस्ति पुरुषो महान् ।
श्रेष्ठा ये वस्तुतो नात्मश्लाघां ते जातु कुर्वते ॥५२०॥

नवीना ऋषयः

संलग्ना मानवा ये स्युर्वेदानां पठने शुभे ।
ऋषीन् नव्यान् विजानन्तु तान् सर्वान् मानवाः समे ॥५२१॥

ऋषिं मामभिजानन्ति भवन्तो नास्म्यहं परम् ।
कणादादिपुरः सत्यं काठिन्येन बुधोऽस्म्यहम् ॥५२२॥

परोपकारः

परमार्थप्रियाः सन्तः सन्तप्ता अपि भूतले ।
विसृजन्त्युपकारस्य करणं जातुचिन्नहि ॥५२३॥

विना परोपकारेण नास्ति मानवजीवनम् ।
पशूनां जीवनादुच्चतरं सत्यमिदं कटु ॥५२४॥
मानापमाननिन्दानां परित्यागं विना नरः ।
हितोपकारमन्येषां कर्तुं नार्हो भविष्यति ॥५२५॥
ये कुर्वन्ति मनुष्येभ्यः प्रदानं ज्ञानचक्षुषम् ।
पितृसञ्ज्ञां लभन्ते तेऽविद्यातामिस्रनाशकाः ॥५२६॥

पुत्रः

निरन्तरं क्लिश्यति भाग्यहीनो ददाति दुःखं पितृभ्यां सुतो यः ।
यत्सेवया तौ भवतः प्रहृष्टौ प्रजासु प्राप्नोति यशः स्तुतिं सः ॥५२७॥
रविः प्रदीप्तः सकलान् प्रकाश्य ददाति तेभ्योऽमितमोददानम् ।
यथा तथा सर्वसुखस्य दात्री सुसन्ततिः सन्ततमेव नृणाम् ॥५२८॥

विजयी

बलान्नशक्तिसंपन्नः सुमतिः पृथिवीतले ।
अधिगच्छति सर्वत्र विजयश्रियमुत्तमाम् ॥५२९॥

संन्यासिहृदयम्

प्राणघातकपीडापि पीडयत्येव सन्ततम् ।
संन्यासिहृदयं स्निग्धं कोमलं स्वात्मवत् सदा ॥५३०॥

धर्मः

ईश्वरेण रचिता रविचन्द्रवायुवारिवसुधादिपदार्थाः ।
सर्वमानवहिताय तथैव निर्मितः किमु न मानवधर्मः ॥५३१॥
मतानां यत्र सर्वेषामैकमत्यं विराजते ।
ते सदाचारधर्माङ्गा प्रभुधर्मतया मताः ॥५३२॥
अधिकांशमनुष्याणामधिकोपकृतिर्यया ।
कृत्या स्यात् सा कृतिः सद्भिः सुकृतिः कथ्यते सदा ॥५३३॥

गोरक्षा

वसुधामहदैश्वर्यसाधिका विद्यते यथा ।
अत्यन्तसुखदात्री गौरघ्न्या निखिलैरतः ॥५३४॥

गवादेर्विनाशेन नाशः प्रजाया
नृपादेश्च संजायते शीघ्रमस्मात् ।
पयोऽन्नाद्यभावस्तदा शीघ्रभावी,
यदाविर्भवत्यल्पतार्तिः पशूनाम् ॥५३५॥
कार्यं सर्वोत्तमं सर्वाधिकलाभविधायकम् ।
अतोऽखिलजनैर्भद्रकारकं धेनुरक्षणम् ॥५३६॥

कर्मफलम्

यादृग्विधानि कर्माणि मानवाः कुर्वते भवे ।
तादृशान्येव जन्मानि भोगांश्च प्राप्नुवन्ति ते ॥५३७॥
स्वप्नेऽपि नो विलयमेति विनैव भोगम्,
केनापि जातु पुरुषेण कृतं हि पापम् ।
तस्मान्न युक्तमिह तस्य निवारणाय,
संप्रार्थनं भवपतेः करणं कृतेश्च ॥५३८॥
गोपविहीना गावो वत्सान्खे स्थितरश्मीन् यथा समीरः ।
मित्रं मित्रं यथा तथैव कर्माणीह लभन्ते जीवान् ॥५३९॥
शुभं जन्म लभन्ते ये कर्तारः शुभकर्मणाम् ।
अधर्माचारिणो नीचं लभन्ते जन्म सन्ततम् ॥५४०॥
पूर्वजन्मकृतैः पापैर्विना पुण्यैश्च जातु न ।
कायबुद्ध्यादिकं लभ्यमुत्तमाधममध्यमम् ॥५४१॥
भोक्तव्यं पापपुण्यानां फलमेतत् सुनिश्चितम् ।
भोगं विना न नश्यन्ति, तेन नश्यन्ति सत्वरम् ॥५४२॥
भवन्ति पापपुण्यानि केवलं नरजीवने ।
पश्वादिजीवने भोगः केवलं तानि जातु न ॥५४३॥

पुरुषार्थः

सायं प्रातः शयनालस्ये त्यक्त्वा ये पुरुषार्थनिमग्नाः ।
ईश्वरभावरताः पुरुषास्ते प्राप्नुवन्ति बहुवित्तसमूहम् ।५४४।
उद्यमं ये न कुर्वन्ति न लब्धुं शक्नुवन्ति ते ।
श्रियं राज्यश्रियञ्चात्र लभन्ते पुरुषार्थिनः ॥५४५॥

निरन्तरं समुद्योगं ये कुर्वन्ति जना भवे ।
दारिद्र्यतिमिरं घोरं सूर्यवन्नाशयन्ति ते ॥५४६॥

वित्तेन वाचा वपुषा हृदा यः समुद्यमः शोभनकार्यसिद्ध्यै ।
स एव चोक्तः पुरुषार्थरूप आलस्यलेशोऽपि भवेन्न यत्र ॥५४७॥

प्रारब्धात् पुरुषार्थो हेतोरस्मान्महत्तरो लोके ।
तस्मिन् सिध्यति सिद्धिस्तस्य न सिद्ध्यत्यसिद्धिश्च ॥५४८॥

यदि स्यात् पुरुषो लोके पुरुषार्थपरायणः ।
लब्ध्वा विद्यां यशो लक्ष्मीं माननीयो बुधैर्भवेत् ॥५४९॥

पुरुषार्थपरेष्वेव दयालुर्भवतीश्वरः ।
नरेष्पालस्यमग्नेषु न स्वप्नेऽपि कदाचन ॥५५०॥

राज्यप्राप्तिः विनैश्वर्यं राज्यश्रीः राज्यकं विना ।
राज्यश्रिया विना भोगो नास्त्यतः स्यात्समुद्यमी ॥५५१॥

नरः करोति साहाय्यं धर्मार्थं पुरुषार्थिनः ।
यथा तथा विधातापि नरस्य पुरुषार्थिनः ॥५५२॥

साधयन्ति स्व कार्याणि नियमेन रवीन्दुवत् ।
व्यवहृत्य नरा ये तु ते भवन्ति सदोन्नताः ॥५५३॥

वर्णाश्रमाः

गृहाश्रमं विना यस्मात् सन्ततिर्नैव जायते ।
अन्याश्रमस्थितिः साध्या कथमस्ति तया विना ॥५५४॥

निन्द्यो जनः स एवास्ति यो गृहाश्रमनिन्दकः ।
स एवास्ति प्रशस्यश्च योऽस्ति तस्य प्रशंसकः ॥५५५॥

गृहाश्रमे चरन्ती या पातिव्रतपरायणा ।
यश्च पत्नीव्रतो लोके द्वाविमौ प्राप्नुतः सुखम् ॥५५६॥

करुणारससिक्तानि वचांस्युक्त्वा, प्रदाय च ।
अन्नादीन् प्राणिनः सर्वान् सुखयन्तु गृहस्थिनः ॥५५७॥

विचारपूर्वकं सर्वहितं कुर्वन्ति सर्वदा ।
ये गृहस्थाः सदा तेषामुन्नतिर्जायते ध्रुवा ॥५५८॥

प्रजापालनं सेवनं चातिथीनाम्
सुरक्षां तथा बुद्धिविद्याविवृद्धिम् ।
गृहस्थाः सदा द्वेषभावस्य हानि
समे रागहीनाश्च कुर्वन्तु नित्यम् ॥५५९॥

ब्रह्मचर्येण वेदानामभ्यासेन बलं तथा ।
ज्ञानं विवर्धते वह्निरेधसा सर्पिषा यथा ॥५६०॥

पालयेद् ब्रह्मचर्यं यः कृत्वा चणकचर्वणम् ।
मांसाशिभ्यो नरः स स्यात् निश्चितं गलवत्तरः ॥५६१॥

सम्यक् सर्वाश्रमाधारे ब्रह्मचर्ये सुपालिते ।
आश्रमाः पालिताः सर्वे नष्टे नष्टा भवन्ति च ॥५६२॥

मानवाः ब्रह्मचर्यं ये लोपयन्ति न ते समैः ।
रोगैर्हीनाश्चतुर्वर्गं प्राप्नुवन्त्यप्रयत्नतः ॥५६३॥

ब्रह्मचर्यं गृहस्थं च संसेव्य पुरुषो भवेत् ।
वानप्रस्थाश्रमी नूनं सश्रद्धं भद्रकाम्यया ॥५६४॥

अभ्यासेन च योगेन ब्रह्मचर्येण मानवः ।
अनायासेन लभते शीतातपसहिष्णुताम् ॥५६५॥

मानवो यो भवेद्धीनः कर्तव्यैर्धर्मकर्मभिः ।
तस्य यज्ञोपवीतं तु गृहीतव्यमसंशयम् ॥५६६॥

ब्रह्मचर्यमहत्त्वं यन्निगमागमवर्णितम् ।
तदस्त्यक्षरशः सत्यं स्वानुभूत्या वदाम्यहम् ॥५६७॥

चातुर्वर्ण्याश्रितं भेदभावं भित्त्वा विनिर्मितिः ।
बन्धुभावं समाश्रित्य कर्तव्या स्नेहसद्मनः ॥५६८॥

प्रवचनशयनम्

कोमला पुष्पशय्यास्ति हिता भागवती कथा ।
यद्युन्निद्रो भवेत् तत्र कुत्र निद्रावशो भवेत् ॥५६९॥

नृत्यगीतादिभावानां पर्यंके कण्टकाचिते ।
आरूढस्यात्मनो निद्रा कथं स्यान्नपराङ्मुखी ॥५७०॥

हिन्दूधर्मस्य दृढता

लौहाद् दृढतरो हिन्दू-धर्मः सूत्रनिभोऽस्ति न ।
त्रोटितुं शक्यते लोहं हिन्दूधर्मो न जात्वपि ॥५७१॥

शुभाशुभमतोत्तालतरंगाकुलवारिधिः ।
हिन्दूधर्मोऽस्ति नष्टेषु तरंगेषु न नश्यति ॥५७२॥

वेदाज्ञापालनं कुर्युर्निराकारस्य पूजनम् ।
त्यजेयुर्दुर्गुणान् सर्वे कामनैषास्ति मामकी ॥५७३॥

खण्डनं नः कृतं खड्गैः स्वराज्ये यवनैः सदा ।
निषिध्यते महद्दुःखं तेषां वाचापि खण्डनम् ॥५७४॥

सहभक्षणम्

सहाशनेन जायन्ते रोगाः संसर्गजा अतः ।
वैद्यकप्रतिकूलत्वात् वर्जयेत् सहभक्षणम् ॥५७५॥

नीतिवचनम्

उच्चस्थानस्थितो नीचो महत्त्वं नाधिगच्छति ।
नृपमूर्ध्नि स्थिता तुच्छा मलिना मक्षिका यथा ॥५७६॥

मुक्तितः पुनरावृत्तिः

मुक्तितः पुनरावृत्तिः समीचीनास्ति सर्वथा ।
असम्भाव्यं फलानन्त्यं यतः सान्तस्य कर्मणः ॥५७७॥

सृष्टिनिर्माणप्रयोजनम्

ईश्वरे सृष्टिनिर्माणशक्तिरस्ति निसर्गजा ।
चतुर्वर्गाप्तये नृणां तेन सृष्टिर्विनिर्मिता ॥५७८॥

कृषि-प्रशंसा

न तुच्छा कर्षका यूयं निर्दोषा वोऽस्ति जीविका ।
प्रजा नृपाश्च पाल्यन्ते स्वन्नैर्युष्मदुपार्जितैः ॥५७९॥

आधुनिकब्राह्मणाः

दानान्नभोजिनो विप्रा मिथ्यामाहात्म्यनिर्भराः ।
जीविकोपार्जने लग्ना अशुद्धानि मनांस्यतः ॥५८०॥
तेषां सन्ति पतन्त्येव तेऽधोऽधः प्रत्यहं द्विजाः ।
दैन्यमग्नाः श्रिया शून्यास्तेजोहीना मलीमसाः ॥५८१॥

पुराणविरोधः

वेदैः सह पुराणानां संगतिस्थापने मया ।
श्रमो बह्वब्दपर्यन्तमकारि बहुशः परम् ॥५८२॥
वेदैरसंगतिं तेषां विरुद्धत्वं विलोक्य च ।
प्रामाण्यस्य परित्यागं तेषां विहितवानहम् ॥५८३॥

श्रेष्ठं जीवनम्

शुभं तज्जीवनं दृश्यजगद्वद् यत् क्रियात्मकम् ।
सक्रियायां स्थिताः सृष्ट्यां क्रियाहीना वयं कथम् ॥५८४॥
अतो मर्मेदमज्ञात्वा ये निवृत्तिपरायणाः ।
वैदिकस्य न धर्मस्य लेशमात्रं विदन्ति ते ॥५८५॥
करिष्यन्त्यधिकं कार्यं रोगहीना मिताशिनः ।
मिताशी न कृशः कश्चित् कृपणो न मितव्ययी ॥५८६॥

मौनम्

ऋतस्य कथनं मौनं मतं ज्ञानवतां कृते ।
वाचोऽवरोधं कर्तुं तु समर्था बालिशा अपि ॥५८७॥

स्वदेशवेशः

धृत्वा वेशं स्वदेशस्य तद्वस्तून्युपयुज्य च ।
मानवो शोभते यादृक् न तादृक् परवेशभृत् ॥५८८॥

निवृत्तिमार्गः

करणं कर्मणां वेदविहितानां विसर्जनम् ।
निषिद्धानां, समाख्यातो निवृत्तेर्मार्ग उत्तमः ॥५८९॥

पूर्ववत्स्याद्भवान् मार्गे निवृत्तेरेव चेत् स्थितः ।
असंशयं विमुक्तः स्यादस्मिन्नेव स्वजन्मनि ॥५९०॥
परं परोपकारस्य भूत्वा कर्मपरायणः ।
स्वमुक्तये परं जन्मावश्यं संधारयिष्यति ॥५९१॥
स्वमुक्त्यै चिन्तितो नास्मि हे महात्मन् मनागहम् ।
मुक्तयेऽहं सचिन्तोऽस्मि शतशो देशवासिनाम् ॥५९२॥
विमुक्ताः सन्तु ते सर्वे तदर्थं जन्मधारणे ।
जानातु सत्यं खिन्नं मे न भविष्यति मानसम् ॥५९३॥
दुःखानां त्रासतो दीनदशाया मोचयन् जनान् ।
दौर्वल्यतश्च मुक्तोऽहं भविष्यामि प्रभोः सुतान् ॥५९४॥

विद्यार्थी

छद्मना रहिता छात्रा ये सेवन्ते बुधान् ध्रुवम् ।
ते विद्यायाः प्रकाशेन जायन्ते सुप्रकाशिताः ॥५९५॥
नद्यो यथा जलनिधिं वटवः ! तथैव
विद्यायुता विनयसारसमन्विताश्च ।
वाचः सदैव भवतः परिभूषयन्तु,
सत्यं हितं च जगते वचनं भवेद्वः ॥५९६॥

प्रारब्धम्

पूर्वार्जितोऽस्ति भोगस्ते यत्त्वं प्राप्नोषि साम्प्रतम् ।
परित्यक्तेऽपि पाखण्डे तन्न्यूनं न भविष्यति ॥५९७॥
पूर्वस्य जन्मनो भोगः प्रारब्ध इति कथ्यते ।
कर्तव्यः पुरुषार्थोऽस्ति शास्त्रकर्मक्रियामयः ॥५९८॥
कारणं यस्य भोगस्य भवेऽस्मिन् नोपलभ्यते ।
मन्यन्ते परिणामं तं कर्मणां पूर्वजन्मनः ॥५९९॥

आधुनिकाः आर्याः

आसन् प्राचीनकाले श्रुतिविहितसदाचारसंस्कार युक्ताः ।
आर्यास्तेषां प्रजासीदमितगुणवती शूरवीरा वदान्या ।

अद्यत्वे ते समस्ता बहुतरविषयानन्दसक्ता अभूवन् ।
तेषां पुत्रादयोऽतो गुरुतरलघुतादीनतापंकमग्नाः ॥६००॥

सूतकनिषेधः

सन्ध्याग्निहोत्रसदृशं शुभकार्यजात-
मस्मिन् त्यजन्ति मनुजा खलु सूतकादौ ।
ना कोऽपि न त्यजति तस्करतामसत्यं ।
वैफल्यमस्य विदितं शुभनाशकस्य ॥६०१॥

मनुस्मृति

आर्याणां रीतिनीतीनां मनुस्मृतिरियं निधिः ।
आर्यवैदिकधर्मस्य सारोऽस्यां निहितः समः ॥६०२॥
अस्या अध्ययनं कार्यकुशलं कुरुते नरम् ।
विदधाति च तं तूर्णं व्यवहार विचक्षणम् ॥६०३॥

आस्तिकः

स्वांगवन्निखिलानात्मीकृत्यैव परमात्मना ।
आत्मना साध्यते स्नेहः सर्वक्षुद्वारणेन च ॥६०४॥
कञ्चित् प्रति घृणां नैव कुरुते विजहाति च ।
नीचोच्चभावनामन्यदुःखवारणकर्मणि ॥६०५॥
स्वात्मवद्यततेऽजस्रं ज्ञानवान् यस्तु मानवः ।
आस्तिकः स यथार्थोऽस्ति भक्तश्च परमात्मनः ॥६०६॥ युग्मकम्
नरस्यादर्शलब्धिस्तु प्रभुप्राप्तिर्मता मम ।
अतो नरो दयालुः स्याद् दयालुपरमात्मवत् ॥६०७॥
एवमीशगुणानां यो धारणाभ्यासतत्परः ।
अन्ते स एव पुरुषः प्राप्नोति परमेश्वरम् ॥६०८॥
सर्वत्रैव ममास्तीशो रक्षकः सर्वशक्तिमान् ।
अतोऽहं निर्भयो जातो न कुतोऽपि बिभेम्यहम् ॥६०९॥
यदीच्छति नरो भद्रं स कुर्यात् तर्हि पूजनम् ।
विद्यमानस्य हृदये स्वकीये परमात्मनः ॥६१०॥

छिद्यन्ते ग्रन्थयो नृणां हृदयस्य यदा तदा ।
आत्मज्ञानं लभन्ते ते विरलाः पुरुषोत्तमाः ॥६११॥
तिलेषु तैलवद् व्याप्य आत्मनीशोऽस्ति सर्वतः ।
आत्मज्ञाने ततो जाते ज्ञायते परमेश्वरः ॥६१२॥

मूर्तिपूजनम्

समस्तसम्प्रदायानामाधारो मूर्तिपूजनम् ।
पुराणानि च सर्वाणि समेऽपि मतवादिनः ॥६१३॥
द्वाभ्यामाभ्यां वितन्वन्ति स्वीयं स्वीयं नवं मतम् ।
नानयोः खण्डनं यावन्नार्षग्रन्थसमादरः ॥६१४॥
तावद्भविष्यत्युदयः श्रुतिभिः स्मृतिभिस्तथा ।
प्रतिपादितधर्मस्य संसारेऽस्मिन् न जात्वपि ॥६१५॥
वेदाज्ञापालनं धर्मो मूर्तिपूजा न वैदिकी ।
मूर्तीनां पूजने दोषो वेदाज्ञोल्लंघनात्मकः ॥६१६॥
आधानं हविषो वह्नौ मूर्तिपूजा न विद्यते ।
वायुमण्डलशुद्ध्यर्थं साधनं तदनुत्तमम् ॥६१७॥
वासयन्ति पवनं बहुकालं संगतानि कुसुमानि लतासु ।
कुर्वते च पतितानि धरित्रीमुर्वरां तदनु संगलितानि ॥६१८॥
पुष्पगुच्छनिकरं भवनेषु लाभकारि निहितं च जनानाम् ।
स्थापितानि पवनं प्रतिमासु दूषयन्ति गलितानि जलौघे ॥६१९॥
भ्रान्ताः सन्ति जनाः सर्वे पण्डितैर्मतवादिभिः ।
याता च जडतां बुद्धिर्जनानां जडपूजनात् ॥६२०॥
भावना नेक्षुदण्डस्य काष्ठखण्डे कृता यथा ।
मृल्लोष्ठे शर्करायाश्च मुखं मिष्टं करोति नः ॥६२१॥
मृगेण मृगतृष्णायां कृतापि जलभावना ।
पिपासां तस्य शान्तां न विदधाति कदाचन ॥६२२॥
पाषाणे भावनेशस्य तारयिष्यति नः कथम् ।
विश्वासे भावनायां वा सत्यं तस्मादपेक्ष्यते ॥६२३॥

मन्दिरेभ्यो मनुष्याणां मनसां मूर्तिपूजनम् । कुलकम्
निष्कासयितुमिच्छामि न मन्दिरविनाशनम् ॥६२४॥

गङ्गा

नदीजलेषु सर्वेषु गाङ्गं श्रेष्ठतमं जलम् ।
केनापि विधिना तन्न मुक्तिदं पापनाशकम् ॥६२५॥

अवतारः

मन्यन्ते येऽवतारास्ते केवलं पुरुषोत्तमाः ।
आसन् पालयितारश्चादेशानां परमात्मनः ॥६२६॥
वेदशास्त्रविदो धर्मदयान्यायपरायणाः ।
तादृशाः पुरुषा नासन् पुरा सन्ति न साम्प्रतम् ॥६२७॥

बालविवाहः

जातिजीवनमहीरुहमूलनाशकोऽस्ति खलु बालविवाहः ।
तस्य रक्षणकृते करणीयस्तद्घुणक्षयविधिर्विधिपूर्वम् ॥६२८॥

आधुनिकसाधवः

भक्षन्त्युदरपूरं न भारतीयाः सहस्रशः ।
कणेभ्यः स्पृहयन्तस्ते म्रियन्ते कुक्कुरादिवत् ॥६२९॥
दशायां शोचनीयायामीदृश्यां मानवा यदि ।
तुम्बीकमण्डलुग्राहे साभिलाषा अशोभनम् ॥६३०॥
परिश्रमेण बन्धूनां क्षुधाया विनिवृत्तये ।
अन्नाद्युत्पादनं कार्यं धर्मः सामयिकोऽस्त्ययम् ॥६३१॥
अधर्मापरपर्यायः साधुताऽडम्बरोऽस्त्ययम् ।
असाधवः प्रकृत्या ते वेशमात्रेण साधवः ॥६३२॥

गायत्रीप्रणवजपप्राणायामाः

यावन्निद्रावशो न स्याः प्रणवस्य जपं कुरु ।
जपन् शयानो लभते लाभमत्युत्तमं नरः ॥६३३॥
कुर्यात् प्रतिदिनं जापं गायत्र्या भद्रकारकम् ।
नातः श्रेष्ठतरं वस्तु किञ्चित् दातुमहं क्षमः ॥६३४॥

मनःस्थैर्यं मतेः शक्तेर्वृद्धिर्व्याधेः क्षयस्तथा ।
प्राणायामविधानेनाप्रयासमुपजायते ॥६३५॥
प्रातः सायं विधातव्यः प्रणवस्य जपोऽन्वहम् ।
अयमेवाश्रयोऽस्माकं मतः संन्यासिनां परः ॥६३६॥
चिन्तनेनास्य चाञ्चल्यं चेतसः क्षीयते तथा ।
क्षालनं पापपङ्कस्य पूर्णरूपेण जायते ॥६३७॥
उन्मथ्य मन्मथं चित्तोन्माथिनं मुनयः सदा ।
मन्त्रेणानेन लीयन्ते प्रमोदानन्दनीरधौ ॥६३८॥
गुणानां नामिनो ज्ञानं परमानन्दलब्धये ।
आवश्यकं महल्लोके जपो नाम्नो न केवलम् ॥६३९॥
शब्देन साकमर्थस्य यथा ज्ञानं विजायते ।
नाम्ना सहैव वाच्यस्य तद्वज्ज्ञानमपेक्ष्यते ॥६४०॥
यथोक्ते जलशब्दे तद्वाच्यज्ञानं तथा क्रिया ।
आवश्यक्यस्ति तत्प्राप्त्यै तथैव परमात्मनः ॥६४१॥
नाम तस्यार्थसंज्ञानोपलब्ध्यै च दिवानिशम् ।
धारणाध्यानकरणं परमावश्यकं मतम् ॥६४२॥

आर्यसमाजवाटिका

वाटिकार्यसमाजस्य या नवारोपिता मया ।
मामकीना स्थितिस्तत्र मालाकारस्य विद्यते ॥६४३॥
करोति वाटिकायां स यदोर्वरकपातनम् ।
धूलिदिग्धं भवत्येव तच्छिरो नात्र संशयः ॥६४४॥
धूलिपाषाणचिन्ता मेऽणीयस्यपि न विद्यते ।
हरिता सुफला च स्याच्चिन्तेयं वाटिका मम ॥६४५॥
खनित्वोर्वीं यथाशक्ति वाटिका रोपिता मया ।
अस्यामुर्वरकं चापि पातितं पातयिष्यते ॥६४६॥
शोणितेन स्वकीयेन मदीया अनुयायिनः ।
सेक्ष्यन्त्येनां मुदाजस्रं निर्भयाः पूतजीवनाः ॥६४७॥

अतोऽहं चिन्तितो नास्मि शुष्कैषा संभविष्यति ।
तथापीशस्य विश्वासात् कार्याण्येतादृशानि तु ॥६४८॥
भक्तैः क्रियन्ते सततं जनकल्याणमीप्सुभिः ।
"सूर्याचन्द्रमसोः धाता" स एवास्यापि रक्षकः ॥६४९॥ (कुलकम्)
आर्यसामाजिकाः सर्वे मच्छिष्याः सन्ति साम्प्रतम् ।
आधारभूताः सर्वे ते मम विश्वासनिष्ठयोः ॥६५०॥
कार्याणां मम सम्पूर्ति त एव पुरुषार्थिनः ।
मनोरथानां साफल्यं विधास्यन्ति न संशयः ॥६५१॥

आर्यसमाजप्रवेशः

वेदेषु येषां विश्वासो मानवानां भवेद् दृढः ।
मन्यन्तामात्मनश्चार्यान् समाजे तान् प्रवेशय ॥६५२॥

धार्मिकभेदनिवारणम्

मेलमूलमुपादाय त्यक्त्वा यद् भेदमूलकम् ।
भेदा नाशयितुं शक्या अनायासेन भूतले ॥६५३॥

समारोहेषु योगशिक्षाकारणम्

ईदृशेषु विशालेषु समारोहेषु निश्चितम् ।
हंसा अपि समायान्ति बहुभिः सूकरैः समम् ॥६५४॥
सर्वशक्तिमतोऽपारकृपया परमात्मनः ।
हंसायन्ते क्षणेनैव विष्ठादा अपि सूकराः ॥६५५॥
अतोऽहं योगरत्नानि निःशङ्कं श्रोतृसम्मुखे ।
निक्षिपापि ग्रहीष्यन्ति नीरक्षीरविवेकिनः ॥६५६॥

महर्षेर्दयालुता

युष्मभ्यं मोदकान्याशु दद्याद्युष्मद्गुरुर्न वा ।
वटवोऽवश्यमेवाहं दास्याम्येतेन हेतुना ॥६५७॥
पाषाणैस्ताडितो वृक्षो जडोऽपि मधुरं फलम् ।
दत्तेऽजडो न दद्यां चेत् कः स्यान्मदधिको जडः ॥६५८॥

श्रुत्वा शान्तामिमां वाचं स्वामिनः स्नेहसंयुताम् ।
लज्जितोऽधोमुखो जातः स्वशिष्यसहितो गुरुः ।।६५९।।
निर्दोषा बालका एते केवलं दोषभागहम् ।
मिष्टान्नलोभेनानीता येनैते पापिना मया ।।६६०।।
क्षमामपि कथं याचे क्षान्तोऽस्मि भवता स्वयम् ।
प्रायश्चित्तावकाशोऽपि दत्तोऽभाग्येन न त्वया ।।६६१।।
रौरवे नरके नूनं पतिष्यामि न संशयः ।
तत्रापि न मया स्थानमथवा लप्स्यते ध्रुवम् ।।६६२।। कुलकम्

महर्षिनिर्भयता

सत्यमेव वदिष्यामि रुष्टा राज्याधिकारिणः ।
भवेयुश्चक्रवर्ती वा स्वयं स्यात् कुपितो नृपः ।।६६३।।
क्षणभंगुरदेहस्य नाहं स्वप्नेऽपि शाश्वतम् ।
धर्मं त्यक्ष्यामि रक्षायै सत्यं वा सत्यजीवनः ।।६६४।।
सत्यं कान्तिमुपैति दीप्तिममलां तप्तं विरोधाग्निना,
प्रक्षिप्तं बहुशो विभावसुचये स्वर्णं यथा निर्मलम् ।
उद्गीर्णाग्निचये शतघ्निवदने संस्थापितस्यापि मे;
निर्यास्यन्ति मुखादजस्रगतिना मन्त्राः श्रुतीनां सदा ।।६६५।।
अंगुलीर्वर्तिकाः कृत्वा मामकीना जना यदि ।
प्रज्वालयेयुश्चिन्ता का सत्यं वक्ष्यामि नामृतम् ।।६६६।।

महर्षिधर्मः

वेदोक्तमार्यावर्तीयमाद्यं धर्मं सनातनम् ।
विहाय न परं धर्मं स्वप्ने स्वीकृतवानहम् ।।६६७।।
न चाग्रे स्वीकरिष्यामि स्वीकरोमि न साम्प्रतम् ।
अयमेव परो धर्मः संश्लिष्टश्च ममात्मनि ।।६६८।।
गच्छन्ति यदि गच्छेयुर्मे प्राणा नास्मि चिन्तितः ।
एतद्धर्मविरोधस्तु न संभाव्योऽस्ति जात्वपि ।।६६९।। (कुलकम्)

वेदानामेव श्रेष्ठत्वं मन्येऽस्मात् कारणादहम् ।
अर्हन्ति भवितुं सर्वे, आर्या वेदानुयायिनः ॥६७०॥

बालिकायै प्रणामः

चतुर्वर्षवयस्केयं बालिका मातृरूपिणी ।
अस्माकं जनयित्री या पालयित्री च विद्यते ॥६७१॥
प्रत्येनां श्रद्धयोपेतो जातोऽस्मि नतमस्तकः ।
युष्मन्मूर्तिप्रभावो न कारणं प्रणतौ मम ॥६७२॥

यथाशक्ति दानम्

दानं तावत् प्रदातव्यं स्याद् भिक्षुर्येन नो नरः ।
तावदग्रे न गन्तव्यं यतः श्रेयोनिवर्तनम् ॥६७३॥
कामयेऽहं न संगृह्यं समस्तं तावकं धनम् ।
त्वाञ्च त्वत्परिवारं च कर्तुमन्यजनाश्रितम् ॥६७४॥
धर्मस्य पालनाद् यस्य धर्मोऽन्यो विकृतो भवेत् ।
पालनीयो मनुष्येण न स कल्याणकांक्षिणा ॥६७५॥
शोभा का मन्दिरस्यास्ति तस्य यस्य विनिर्मितौ ।
त्वदीयो जीविकोपायो व्यापारोऽवसितो भवेत् ॥६७६॥
तस्माद् दशसहस्रेषु रूप्यकेषु सहस्रकम् ।
एकं ग्रहीतुमिच्छामि त्वत्तोऽहं दानिनां वर ॥६७७॥

दानग्रहणयोग्यता

भोगे पुण्यं यथा यज्ञशेषस्यास्ति तथैव च ।
कृत्वा परोपकारं तद्दत्तान्नस्य निषेवणे ॥६७८॥
परान्नग्रहणात् पूर्वं चिन्तनीयमिदं सदा ।
अधिकारो ममास्त्येतद्ग्रहणस्याथवास्ति न ॥६७९॥
दानिनो ये स्वकीयं स्वं श्रद्धया विनयेन च ।
यच्छन्ति मह्यं तेभ्यः किं कुर्वेऽहमिति चिन्त्यताम् ॥६८०॥
पुरुषार्थविहीनं तं धिग् जनं यः श्रमं विना ।
भूत्वा परोपजीव्यस्मिन् भवे जीवति निस्त्रपः ॥६८१॥

स्व विदेशगमननिषेधः

स्वर्लोकसदृशे यस्मिन् भारते निवसाम्यहम् ।
तत्राविद्यान्धकारोऽस्ति महाघोरो दृढस्थितिः ॥६८२॥
देशस्य मम जायन्ते दरिद्राः प्रत्यहं नराः ।
समाजे च कुरीतीनां साम्राज्यं सर्वतोमुखम् ॥६८३॥
अतः पूर्वं स्वदेशस्य सुधारकरणं परम् ।
मन्ये स्वकीयं कर्तव्यं पवित्रं प्रथमं हृदा ॥६८४॥
देशान्तरमहं गत्वा शान्ति नाप्स्यामि मानसीम् ।
स्वदेशवासिनां चिन्ता चिता चित्ते ज्वलिष्यति ॥६८५॥
अशान्तचेता धर्मस्य प्रचारकरणे कथम् ।
समर्थोऽहं भविष्यामि चिन्त्यतां भवता स्वयम् ॥६८६॥
भावत्कीं प्रार्थनामूरीकर्तुं न प्रभवाम्यहम् ।
अतोऽपराधः क्षन्तव्यो भवद्भिः सकलैर्मम ॥६८७॥

नृपाय प्रतिवचनम्

भवान् तुच्छप्रलोभेन मां देवात् परमात्मनः ।
तवादेशपरित्यागाद् विमुखीकर्तुमिच्छति ॥६८८॥
धावित्वा लघुराज्यात्ते वहिर्गन्तुं क्षमोऽस्म्यहम् ।
प्रभोरादेशभंगाय समर्थं तत् कथं भवेत् ॥६८९॥

प्रतापचित्रदर्शनम्

हस्तचित्रं प्रतापस्य महाराजस्य संपिबन् ।
नेत्राभ्यां निर्निमेषाभ्यां जगादेदमृषिर्वचः ॥६९०॥
चित्रस्य पश्य सौन्दर्यं पूर्वजस्यात्मनो नृप !
गौरवं राजते कीदृक् गुरुत्वं च मुखाम्बुजे ॥६९१॥
चित्रादुद्गच्छतीवेयं वीरता शत्रुतापिनी ।
मानसं धृतवैराग्यं संमोहयति मामकम् ॥६९२॥

वेश्यागमननिषेधः

राजन् भवन्ति राजानो भुवि शार्दूलसन्निभाः ।
कुक्कुरीसदृशा वेश्या अर्थकामा गतत्रपा: ॥६९३॥

गर्हणीयास्ति सिंहस्य शुन्यासक्तिर्नरेश्वर ।
नितान्तं विपरीता च कुलजात्योश्च संस्कृतेः ॥६९४॥
किमर्थं कुक्कुरी सिंहकन्दरां वीतसाध्वसा ।
प्रविष्टा पातयित्रीयं पतिता च स्वयं नृप ॥६९५॥
इदं दुर्व्यसनं धर्मकर्मणामस्ति नाशकम् ।
अनेन मानमर्यादे भवतश्च कलंकिते ॥६९६॥
शान्ति च परिवारस्य व्यसनं हन्ति निश्चितम् ।
इदं तस्मात् परित्याज्यं सदा कल्याणकामिना ॥६९७॥ (कुलकम्)

पातिव्रतम्

वित्तशक्तिमतां देशवासिनां भोगवादिनाम् ।
आचाराश्च विचाराश्च नाशयेयुरिमामलम् ॥६९८॥
एषा च तरणी मध्यधारायां मज्जनोन्मुखी ।
रक्षत्येनां परं पत्नीपातिव्रतमनारतम् ॥७६९॥

विषप्रदातारं प्रति

जानासि न जगन्नाथ ! निधनात् साम्प्रतं मम ।
अपूर्णानि भविष्यन्ति राष्ट्रकार्याणि पूर्णतः ॥७००॥
लोकस्य महती हानिर्जातास्ति कियती ? भवान् ।
नैतज्ज्ञातुं क्षमो धातुर्विधानमिदमद्भुतम् ॥७०१॥
दोषास्पदं भवन्तं न मन्येऽस्मिन् विषये मनाक् ।
ददामि भवते वित्तं पारेराज्यं प्रयात्वरम् ॥७०२॥
शक्यन्ते रक्षितुं प्राणा नेपालगमनात् तव ।
ज्ञातवृत्तो नृपः पूर्णविनाशं ते करिष्यति ॥७०३॥
रक्षणं तव तत्कोपात् कर्तुं कः प्रभविष्यति ।
पलायस्व जगन्नाथ विलम्बालम्बनं त्यज ॥७०४॥
नावगच्छेत् परः कोऽपि कर्मैतत् तावकं शृणु ।
प्रतिजानाम्यहं कश्चिद्भेदं मत्तो न वेत्स्यति ॥७०५॥ (कुलकम्)
इत्युक्त्वा स दयानन्दो निजप्राणविघातकम् ।
अमोचयद् वधाद् बन्धाद् वधिकं तं दयान्वितः ॥७०६॥

नृपं प्रत्युपदेशः

राजन् स्थानं न दातव्यं चिन्तायै निजमानसे ।
ललाटलिखितं धात्रा मार्जितुं कः क्षमो भुवि ॥७०७॥
रोगा वसन्ति छायावच्छरीरे क्षणभंगुरे ।
विकारे प्रकृतेर्देहे विकारो नास्ति विस्मयः ॥७०८॥
मा भूः शोकाकुलः प्रोतस्त्वत्कृतैः स्नेहसत्कृतैः ।
अस्म्यहं विद्धि मां राजन् त्वं स्वस्य हितकारिणम् ॥७०९॥

पाण्ड्यं प्रत्युपदेशः

भवेः खिन्नो न हे पाण्ड्य ! प्रभोरीहितमीदृशम् ।
देहोत्पत्तिर्विनाशश्च जलबुद्बुद्वद् भवे ॥७१०॥
सागरोर्मिसमानं वा भूयो भूयोऽभिजायते ।
मरणाभिमुखो जीवलोकोऽयं विद्यते सदा ॥७११॥
औचित्यमस्ति शोकस्य भवेत्तेद्यदसाम्प्रतम् ।
योगे वियोगो निर्माणे विनाशः शाश्वतो मतः ॥७१२॥
विनाशिनोऽस्य देहस्य कृते शोको न युज्यते ।
जन्मैव यस्य संसारे विनाशाय प्रजायते ॥७१३॥

आत्मानन्दं प्रति

आत्मानन्दमृषिः प्रेम्णा ललाटे संस्पृशन् शनैः ।
उवाचेदं कियत्कालं शरीरं क्षणभंगुरम् ॥७१४॥
स्वस्थं स्थास्यति लोकेऽस्मिन् नितान्तं नश्वरेऽस्थिरे ।
पालयन् निजकर्तव्यं हृष्टो भूया निराकुलः ॥७१५॥
संयोगसमकालं हि वियोगोऽपि विजायते ।
वियोगहीनः संयोगो वियत्पुष्पसमो मतः ॥७१६॥

प्रभुं प्रति

प्रभो दयोदधे ! सर्वशक्तिमन् ! परमेश्वर ।
अयमेवाभिलाषस्ते तवैव च न संशयः ॥७१७॥

पूर्णा स्याद् भवदीयेच्छा कृपालो हे प्रभो त्वया ।
कृता विचित्रा लीलेयं लीलाधर ! समेम्यहम् ॥७१८॥
ओमोमोम् व्याहरन् ध्यायन् स्वप्रियं परमेश्वरम् ।
असून् तत्याज सानन्दं दयानन्दो दयामयः ॥७१९॥

'चौहान थोक, हरदोई, उत्तर प्रदेश'-निवासिना विद्याभास्कर-श्रीशिवकुमारमिश्रसाहित्याचार्येण संस्कृत-हिन्दी-एम०ए० उपाधिधारिणा संकलिता सरसपद्यैरनूदिता च महर्षेः दयानन्दस्य सूक्तिसप्तशती समाप्ता ।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी („ „)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („)	रु० ३०.००
९.	„ „ „ (द्वितीय खण्डः) („)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरिपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० गुलेलचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.०
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	सूक्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् („) („)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) („ „)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४.०००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.०
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४.०००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.